VAKULAMĀLINĪ PARIṆAYAM

Editors
P.G. SEETHARAMAN
R. GANESAN

TNSDA
09941

General Editor
K. DAMODARAN M.A.,

Govt. Oriental Mss. Library Publication No.447
Sanskrit Publication No: 120

VAKULAMĀLINĪ PARIṆAYAM

Editors

P.G. SEETHARAMAN (Siromani)
R. GANESAN (Siromani)
Sanskrit Pandits,
G.O. M.L.
Chennai-5.

General Editor

K. DAMODARAN M.A.,
Director,
Department of Archaeology,
Chennai-113.

Price Rs.67/- (© G.O.M.L.1999)

TAMIL NADU STATE DEPARTMENT OF ARCHAEOLOGY
LIBRARY.
Acc. No. 9941
Date
MADRAS-28.

राजकीयप्राच्यलिखितग्रन्थालयप्रसिद्धीकरणसङ्ख्या 447
संस्कृतप्रसिद्धीकरणसङ्ख्या 120

वकुलमालिनीपरिणयम्

सम्पादकौ
प्र.ग. सीतारामः (शिरोमणिः)
रा.गणेशः (शिरोमणिः)

संस्कृतपण्डितौ
जि.ओ.एम्.एल.
चेन्नै .5

सामान्यसम्पादकः

कु.दामोदरः
निर्देशकः
पुरावस्तुगवेषणविभागः
चेन्नै-113

मूल्य : 67 रुप्यकाणि

1999

THE SMELL OF VAKULA !

The marriage between Krishna and Vakulamalini is the central theme of the prose drama knitted by Viravalli Srinivasan of Srimushnam (Tamil Nadu)

An indepth research should be made with a reference rendered by the author himself regarding Kāri, one of the seven philanthropists of Sangam Age, in resemblence of whom the author has portrayed a character, here, by name Kārivasu.

So, it goes without saying that it contains many faceted research aspects.

- ***Dr. S. SOUNDARAPANDIAN***
M.A. (Tamil), M.A. (Eng.), B.Ed., Dip. Sanskrit, Ph.D.,
Curator

வகுளமாலினி பரிணயம்

வீரவல்லி சீனிவாசன் என்பவர் இந் நாடகத்தின் ஆசிரியர்.

இவர் கி.பி.. 17ஆம் நூற்றாண்டில் வாழ்ந்தவர். இவர் ஸ்ரீமுஷ்ணத்தைச் சேர்ந்த, தமிழைத் தாய்மொழியாகக் கொண்ட வடமொழிப் புலவர்.

“கடையெழு வள்ளல்களில் ஒருவரான காரியைப் போற்றும் முகத்தான் நான் காரிவசு என்ற அரசன் பாத்திரத்தைப் படைத்துள்ளேன்” என்று இந்நூலில் ஆசிரியரே குறிப்பிடுகிறார்.

எனவே, சங்க இலக்கிய ஆய்வுக்கும் இந்நூல் பெரிதும் பயன்படும்.

தமிழர்கள் வடமொழிக்குச் செய்த தொண்டு என்ற வரிசையில் இந்நூலும் இன்று முதல் சேரும்.

முனைவர் சு. சௌந்தரபாண்டியன்
எம்.ஏ. (தமிழ்), எம்.ஏ. (ஆங்.), பி.எட்., டிப்.வ.மொழி, பிஎச்.டி.,
காப்பாட்சியர்

वकुलमालिनीपरिणयः – नाटिका

प्रस्तावना

विदितमिदं विश्वेषां काव्यं नाम तत् यतश्च सहृदयानां हृदयेषु सुष्ठु आह्लादो जायते, बुधश्च ज्ञातव्यं सरसं जानन् कर्तव्ये कुतुकी भवति इति। तत्र च "काव्येषु नाटकं रम्यं" इति हि सर्वसम्मतम्। यतो हि नाटके कविः बोद्धव्यं अर्थं प्रत्यक्षं दृश्यमानमिव सामाजिकचित्तेषु सम्यक् उपस्थापयति तत एव. दृश्यमिति नाटकानां व्यवहारः। बोद्धारश्च श्रव्येभ्यः काव्येभ्यः ज्ञातमर्थं पुनः पुनः चर्वित्वा हृदयेषु आनन्दं लभन्ते, नाटकेभ्यः तु सर्वमर्थजातं दृश्यमिव सुखं सरसं च बुध्वा नितरां मोदन्ते च। एतेनैव कारणेन दृश्यकाव्यस्य नाटकस्य करणं रसिकानां आह्लादजनने उत्तमं साधनं भवति कवितायाः निकषोपलायमानं सत्०यञ्जयति कवेर्माहात्म्यं च। अत एव कवित्वस्य च उत्तमं पर्यवसानं नाटककरणं भवतीति साहित्यस्य च चरमं स्थानं नाटकं भवतीति च "नाटकान्तं कवित्वं" "नाटकान्तं हि साहित्यं" इति च प्रसिद्धिः।

पूर्वमपि वल्लीसहायकविकृतं "ययातितरूणानन्दं" नाम दृश्यं काव्यं प्रकाशितमस्माभिः । अधुनापि सहृदयहृदयसंरञ्जनाय श्रीनिवासकविरचिता "वकुलमालिनीपरिणय" नाम्नी नाटिका प्रकाश्यते। "विद्वत्कवयः कवय "इत्यस्य आभाणकस्य लक्ष्यभूतोऽयं कविः। इयं नाटिका ग्रन्थालये अत्र R793 इत्यङ्कवति काकदीयपुस्तके, R 3154 इत्यङ्कवति तालपत्रसम्पुटे च समुपलभ्यते। एतत्कोशद्वयसाहाय्यमवलम्ब्व इयं नाटिका संशोध्य प्रकाश्यते। ग्रन्थारम्भे ग्रन्थपातो वर्तते यत्र हि कविचरितसमर्पकभागो लुप्तः।

अयं श्रीनिवासकविः अम्बुजवल्लीकल्याणनाटकं आनन्दरङ्गविजयचम्पूमपि रचयामास। पिताऽस्य श्रीवीरवल्ली वरदनारायणः। निवासस्थानमस्य श्रीमुष्णाख्यं वैष्णवं दिव्यक्षेत्रम्। गोत्रमस्य कौण्डिन्याभिधानं भवति।

नाटिकालक्षणं दशरूपके एवं दृश्यते । यथा -

नाटिका क्लृप्तवृत्त स्यात् स्त्रीप्राया या चतुरङ्किका
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ।।
स्यादन्तःपुरसम्बन्धा सङ्गीतव्यापृताऽथवा।
नवानुरागा कन्याऽत्र नायिका नृपवंशजा।।
सम्प्रवर्तेत नेतास्या देव्यास्त्रासेन शङ्कितः।
देवी पुनर्भवेज्ज्येष्टा प्रगल्भा नुपवंशजा ।।
पदे पदे मानवती तद्वशः सङ्गमो द्वयोः ।
वृत्तिः स्यात् कैशिकी स्वल्पविमर्शाः सन्धयःपुनः।।

इति

नाटिकात्वसमन्वय एवं-

अत्र मालिनी, मलयवती, कात्यायनी, सत्यभामेति अनेक स्त्रीपात्राभूयिष्ठत्वात् स्त्रीप्रायत्वं, अङ्कचतुष्टयोपेतत्वात् चतुरङ्कित्वं, द्वारकाधिपतिः ललितगुणोपेतः नायकः देवः श्रीकृष्णः -

"निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः"
"सुतसचिवादिनिहितयोगक्षेमतया चिन्ताविहीनो निश्चिन्तः।

अत एव कलासु गीतादिष्वासक्तः, सुखी भोगप्रवणः, शृङ्गारप्रधानत्वात् सुकुमाराकारो मृदुः "-इत्युच्यमानेन धीरललित लक्षणेन सहितः कृष्ण इति तस्य नायकस्य श्रीकृष्णस्य धीरललितत्वं, सत्यभामान्तःपुरसम्बद्धा वकुलमालिनी मलयवतीति नाम्ना चेटीरूपेण विद्यमाना कारिवसुनामकस्य राज्ञः पुत्री नायिका, मानवत्याः सत्यभामायाः त्रासेन प्रवर्तमानः श्रीकृष्णः, तद्वशेन

वकुलमालिनीश्रीकृष्णयोः सङ्गमः, "अत्यन्तसुकुमारार्थसन्दर्भा कैशिकी इत्युक्तरीत्या शृङ्गारस्य – विप्रलम्भस्य – मृदुना सन्दर्भेण समुचितन्यायपुरस्सरं सहृदयहृदयारूढस्य वर्णनात् कैशिकी वृत्तिराश्रिता इति। एवं पूर्वोक्तलक्षणसमुपेतत्वादस्य नाटिकात्वं सन्दृश्यते। कथा हीत्थमस्या नाटिकायाः –

आसीद्विजयधन्वेति, भूपतिः चोलमण्डलस्य। पाण्ड्यमण्डलाधिपतेः महाराजकारिवसोःपुत्री वकुलमालिनी लिप्सुरयं कारिवसुं प्रार्थयामास। तेन वकुलमालिनीपित्रा तिरस्कृतः आक्रम्य पाण्ड्यमण्डलं सिद्धयोगेनामात्येन सह कारागृहेऽबध्नात् कारिवसुम्। कथञ्चिन्निर्गतः केवलममात्यः सिद्धयोगः सत्राजिते वृत्तान्तमिमं कथयितुमाजगाम। कृष्णे निहतचित्ता च वकुलमालिनी मातुर्निदेशात् स्वाभीष्टसिद्धयै मलयपर्वते कृष्णपूजां निर्वर्तयन्त्यासीत्। सत्यभामायाः पिता सत्राजित्तु श्रीकृष्णसेनापतिना महासेनेन सह केरलराजं कामसेनं जेतुमाययौ। तदा कामसेनोऽपि वकुलमालिनीं प्राप्तुं मलयं पर्वतं जगाम। तद्विदित्वा सत्राजित् मलयं गत्वा युद्धे कामसेनं निहत्य तस्य पुत्रं केरले स्थापयामास। कामसेनस्य सैनिकैः मलये वर्तमानां वकुलमालिनीं विज्ञाय सेनापतिना तां द्वारकायां स्वसृः कात्यायन्याः सकाशं प्रापयामास। कात्यायनी चैनां वकुलमालिनीं मलयगिरेरानीतेति हेतोः मलयवतीति नाम कृत्वा सत्यभामाया अन्तःपुरे चेटिकां कारयामास मलयवतीं तां सुमनोहरां कृष्णदृष्टेः अगोचरां अवधानेनापालयत् च। सेयं स्त्रीणमपि मोहनीय सौन्दर्या विराजते स्म।

कदाचित् श्रीकृष्णेनाक्षविहारे रुक्मिणीमप्यधरीकर्तुकामया सत्यभामया पणबन्धः कृतः " यद्यहं पराजिता भवेयं दास्यामि ते कन्यकारत्नं, यदित्वं ; देहि मे मदभीप्सित" मिति। जितं कृष्णेनाक्षविहारे।

सत्यभामा मलयवती वकुलमालिनीत्यजानाना दु:खिता च वकुलमालिनीवृत्तान्तं तस्या: सन्देशमपि अलभमाना, वकुलमालिनीप्रदानेन कृष्णस्य निर्वर्तयितुमक्षविहारपणबन्धं च चिन्तयन्ती तामानेतुमुत्कण्ठिताऽभवत्। तथा मलयवती स्वोन्नत्यै पितृष्वस्रा कात्ययन्योपदिष्टा प्रत्यहं जगज्जनन्या: लक्ष्म्या: पूजां निर्वर्तयन्ती आसीत्। पूजायै पुष्पाण्यानेतुं निर्दिष्टया चेटीभि: सहोद्यानं गतया मलयवत्या कुत्रचन एकान्ते देशे केवलं चित्रपटे दृष्टपूर्व: कृष्ण: साक्षात् दृष्ट:, दृष्टा च कृष्णेन मलयवती प्रत्यक्षमेव। उपसृत्य चैनामङकमारोप्य लालितवान् कृष्ण:। उभयो: प्रेम प्रफुल्लं गाढं चाजनि। अत्रान्तरे पूजार्थमाहूयमाना मलयवती त्वरितं सखीभ्यां पूजागृहं गता। विरहातुर: कृष्ण: मलयवती चिन्ताकुल आसीत्।

अस्मिन् समये लक्ष्मीपूजासमाप्तिमधिकृत्य कात्यायन्या निर्दिष्टा: चेट्य:रात्रौ "रुक्मिणीपरिणया"ख्यां नाटकमभिनयन्ति स्म। तत्रा नेपथ्यरचना इत्थं -मालिनी-कृष्ण: मलयवती रुक्मिणी, कलावती विदूषक:, वसुमती सूत्रधार इति। कात्यायन्या समादिष्टा कलावती "सुरङ्गामार्गेण रङ्गमागत्य कृष्णभूमिकया सह भवानेव प्रविशतु" इति कात्यायनी वदतीति श्रीकृष्णं अकथयत्। कृष्णेन तथाकृते कृष्णभूकियां वर्तमाना मालिनी कात्यायनी निर्देशन सुरङ्गे तिरोहिताऽभवत्। कृष्णेनागत: विदूषक: कम्बलावकुण्ठित: रङ्गशालाया उपरि स्थित: नाटकं पश्यन्नासीत्। स च निद्रावशङ्गत: मध्येनाटकं स्वप्नदृष्टवानरभल्लूकभीत: रङ्गभूमौ न्यपतत्। रूक्मिणीरूपधारिणी मलयवती मालिनीति मन्वाना भीतभीता कृष्णमालिलिङ्ग। तदा सत्यभामा विदूषकमुखेन मलयवतीं कृष्णसङ्गतां ज्ञात्वा परिदूनचेता: कुपिता च तां कारागृहे बबन्ध। कृष्णेऽतीव रुष्टा च निजान्त:पुरमगात्।

अस्मिन्नेव समये कारिवसुसेवकेन वकुलमालिनी सन्देशं प्राप्ता सत्यभामा तामानेतुं कृष्णसाहाय्यं काङ्क्षमाणा आसीत्। समागते च श्रीकृष्णे शान्ता एषा वकुलमालिनीचिन्ताग्रस्ता तामानयितुं प्रार्थयितुकामाऽसीत्।

अत्रान्तरे कारागृहवद्धां मलयवती केनचित् विषजन्तुना दष्टां ज्ञात्वा सर्वे सिद्धयोगादयस्तत्रागच्छन्। सपदि सर्वे सत्यभामागृहं गताः वार्तामिमां कृष्णाय न्यवेदयन्। त्वरितं च श्रीकृष्णस्तत्रागतः यत्रासीत् कारागृहे मलयवती। उज्जीविता च मलयवती श्रीकृष्णेन, सर्वेभ्यः स्वोदन्तकथयद्यथातथम्। विस्मिता स्वकर्मदुःखिता च सत्यभामा स्वसारं वकुलमालिनी कृष्णायादापयत् प्रार्थयत च कारीवसुं मोचयितुम्। तदर्थ च प्रस्थितः श्रीकृष्णः सेनानिवेशस्थाने अमात्यभक्तिसारमुखेन शरणागतं सन्धिमिच्छन्तं विजयधन्वानमक्षमत। श्रीकृष्णमहिमानं जानानः विजयधन्वा ससेनं कारिवसुं सत्कृत्य कारागृहात् मोचयित्वा पाण्ड्यमण्डलं पालयितुं प्रापयामास।

कविरयं अस्यां नाटिकायां गर्भनाटकस्य, चित्रपटदर्शनेन नायिकानायकयोः अनुरागस्य, नामान्तरेण नायिकाया अवस्थानस्य च निरूपणेन श्रीहर्षकृतप्रियदर्शिकादौ भासमानां शैलीमनुवर्तत इति प्रतिभाति।

व्यवहारे विद्यमाना बहवो न्यायास्तत्र तत्रंसुनिपुणं समुचितं च प्रतिपाद्यन्ते। यथा "अक्षिरोगातुरस्य महादीपसन्दर्शनं" "अमत्रे पाषाणपातः","चोरस्य सुरङ्गालाभः" "कषणे खलु कनकपरीक्षा", "घटपुलकन्याय – (स्थालीपुलाकन्याय) सिद्धः खलु कात्यायन्याः प्रभावः "स्त्री खलु वैरकारणं लोकस्य" "भाग्यवन्तमेव फलं प्राप्नोति" इति च।

श्रीकृष्णस्य सेनानिवेशार्थं चम्पकारण्यमध्ये सृज्यमान-नगरालङ्कार: श्रीमद्रामायणे वर्ण्यमानं पन्थानमनुसरति। द्वारकाया: विजयधन्वविजयार्थं विमानेन प्रस्थितस्य श्रीकृष्णस्य विजयध न्वपुरपर्यन्तं मध्येमार्गं वर्ण्यमाना नद्यो देशाश्च - गोदावरी, सह्यजा, प्रभास:, वेङ्कटगिरि:, करिगिरि:, कृष्णधाम, (कृष्णपुरम्) श्रीमुष्णं (कविनिवासस्थानम्) श्रीरङ्ग, चम्पकारण्यं - कवेस्तत्र तत्र प्रीत्यतिशयंव्यन्जयन्ति।

अयं कारिवसु: दानशौण्डेषु सप्तसु द्रविडराजेषु "कारि"[1] इति प्रसिद्धात् क्रैस्तवशताब्द्यां सप्तमाष्टमनवमीनां शताब्दीनां अन्यतमायां विद्यमानात् भिन्न:, यत: श्रीकृष्णेन तत्पूर्वतनेन तत्सुताया: परिणयो वर्णित:। सत्राजिन्नन्दिन्या: सत्यभामाया: कारिवसुपुत्र्या: वकुलमालिन्याश्च सोदरभावो ज्ञायतेऽस्मिन् ग्रन्थे। अथ श्रीमुष्णवासरसिक: कविरयं स्वदेश समीपवर्ति। "देहली"[2] नगरस्य पालयितु: कारिनामकस्य प्रभो: दानशीलस्य प्रशंसायै तमेव कारिवसुं वकुलमालिनीजनकं प्रकल्प्य तस्या: श्रीकृष्णेन विवाहं सत्यभामादिभि: बान्धव्यं च कल्पयित्वा नाटिकामिमां कृतवानिति वक्तुंअपि शक्येत।

कविर्नूतनोऽपि प्रत्नां कविसरणिमाश्रित्य रुचिरं वर्णयन् सुष्ठु काव्यलक्षणपूर्णं विशिष्य रूपकलक्षणपूर्णं च ग्रन्थमिमं विरच्य निखिलानानन्दयति। अतश्चास्या नाटिकाया: प्रकाशनेन बहूपकृतं भवेत् विबुधलोकानामिति मोदामहे ।।

इति शम्

रा.गणेश:

पे.ग. सीताराम:

1. See Kalaikkalanjiyam, Vol.3 Page No.540.
2. Thirukkovalur

AGE OF THE SIDDHA SYSTEM

Dr.S.Soundarapandian
M.A.,M.A.,B.Ed.,Dip.Skt.,Ph.d.,
Curator,
Govt. Oriental Manuscripts Library,
University Library Building,
Chennai - 5.

Many are under the wrong impression that our Siddha System began from the 18 siddhas.

No doubt the contribution of 18 siddha sages is marvellous and unique but our siddha medical pactices never started from these sages.

Considering that our Tamil medical system came to practice by siddhas, Tamil scholars have assigned the date of siddhas as 15th century A.D. and even later.

It is true that our extant texts of siddhas belong to a later period as 15th century; but this does not mean that these were the only siddhas flourished on our Tamil land.

Several scores of siddhas had developed our science in the past thousands of years before the 18 known siddhas like Bhoga, Theraya, Konkana etc.

Is there any proof for this concept?
Yes; there is.

It is true that our literary or grammar books do not furnish evidence beyond the 5th Century B.C.

Even the Brahmi inscriptions cannot give evidence beyond the 5th Century B.C.

So, we have to dig out evidence from some other source.

Our Vedas, now availale in Sanskrit language, do possess the knowledge of the Tamils too.

An indepth study of Vedas do reveal this fact.

So, based on this hidden truth, if we look at the Atharvana Veda, we can see abundant evidences about herbs, pains, joints, bones, poisons etc. which are nothing but the branches of our Siddha System.

Even the Tamil word, 'Nadi' had found a place in Athrvana Veda in the same sense as we have in siddha treatises.

In other words, we have a good reflection of Siddha System in Atharvana Veda.

So, the age of our Tamil Siddha medical practices can be likened to that of the Atharvana Veda.

Date of Atharvan Veda has been considered as 2500 B.C. (C.V.Vaidya, History of Sanskrit Literature, Poona, 1930, P.156.)

So, we can swimmingly view our Siddha medical system belongs to the period 2500 B.C.

PREFACE

Vakulamalini parinaya is a drama in four acts dealing with the marriage of Vakulamalini, the daughter of a king named Karivasu with Lord Krishna. The author is one Viravalli Srinivasa, son of Varadanarayana of Kaundinya gotra and a resident of Srimuṣṇa. He belonged to the 17th Century A.D. The author is said to have written many other works. Of them Ambujavallilparinaya, Varāhavijaya, Sītādivyacaritra, Commentaries on Magha, Raghuvamsa, Naiṣadha and Amaruka are note worthy.

The present edition is a Natikā which is a sub-division of Rupaka. The drama fulfills all the required elements of a Natikā. The heroine , Malayavati alias Vakulamalini, is picturised as the sister of legendary Satyabhama. The author has attributed the qualities of one Dravida king Kāri (8th Century A.D.) to his character Karivasu also. This may be because of the author's affinity to his native place Srimuṣṇam. Dehalinagara, the present Thriukkovalur, a nearby place of Srimusnam was the capital of Kari king.

CHARACTERS ROLES

(Apart from the Sutradhara, nati, Kancuki, Vidusaka, Vaitalika and Dowvarika)

CHARACTERS	ROLES
कृष्णः	– कथानायकः
विजयघन्वः	– चोलमण्डलराजा
कारिवसु	– पाण्ड्यमण्डलराजा
सिद्धयोगः	– अमात्यः
भक्तिसारः	– "
सत्राजित्	– सत्यभामायाः पिता
महासेनः	– कृष्णस्य सेनापतिः
कामसेनः	– केरलराजा
दोहलः	– कृष्णस्य परिजनः
द्विजः	– सारथिः लेखवाहकः
वर्षवरः, मालवः	– दूतौ

वकुलमालिनी (मलयवती)	–	कथानायिका, क ारिवसुपुत्री सत्यभामायाः स्वसा
रुक्मिणी, सत्यभामा	–	कृष्णपत्न्यौ
कात्यायनी	–	कामसेनस्य स्वसा
कलावती, वसुमती	–	चेट्यौ
पद्मिनी, कुमुदिनी	–	,,
मन्दारिका, मालिनी	–	सख्यौ
पुलिन्दी	–	चामरधारिणी
योगिनी	–	योगिनी

The present edition is based upon 2 mss. bearing the following numbers R.3154(d) Palm leaf and R.793 paper.

Dr.S.Rajalakshmi, M.A., Phd.
Sanskrit Pandit
G.O.M.L.

श्रीः

"अथ वकुलमालिनी परिणयः।"

"श्रीनिवासकविविरचितः।।

नान्दी।

चन्द्राकारयदीयचारुनखरश्रेणीप्रभामालिका
सेवानम्रसुराङ्गनाकचभरे मन्दारमालायते।
मुक्तामञ्जरिकायतेऽधिहृदयं श्रीमुष्णधाम्नो हरेः
भूयादम्बुजवल्लितत्पदयुगी भूम्ने मुदां सम्पदाम्।।

अपि च -

कस्याश्चिन्मुखचुम्बनैः सहृदयैः कस्याश्चिदालोकनैः
कस्याश्चित्कुचपीडनैरपि दृढैः कस्याश्चिदालिङ्गनैः।
सर्वासामिति संमदं जनयतः श्रीसत्यभामापतेः
दाक्षिण्यं दिशतादिदं नयदयामुद्राणि भद्राणि नः।।

नान्द्यन्ते -

सूत्रधारः - (सहर्षम्) अहोचिरेण चरितार्थमस्मदीयमनवद्यं कुलविद्यावैशद्यम्। यदेते मयि विनते मयि परमानन्दभवनाधिनाथस्य श्री भूवराहस्य विलासोत्सवसेवा समुत्सुकितचेतसो नानादिगन्ततः संमिश्राः भरतविद्याप्रयासनैपुणीदिदृक्षया मामादिशन्त्यार्यमिश्राः।।

(नेपथ्याभिमुखमवलोक्य)

आर्ये, नटनसामग्रीसंविधनमपि कृतावधानम्?

(प्रविश्य)

नटी- अय्य कहिष्णु विलंबो भवे। णिरवज्जा णणु ते नट्टविज्जा।

(छाया) - आर्य कथं नु विलम्बो भवेत् निर-
वद्या ननु ते नाट्यविद्या ।

सूत्र- (सविमर्शानन्दम्) आर्ये, सत्यमेतदाश्चर्यम्।

निपुणनिचयवेद्या नाट्यविद्या तु हृद्या
जगति विबुधजातं मृग्यमास्ते सुजातम्।
तदपि रसिकलोकाः सङ्गता जागरूकाः
कथय करविधेयं केन वा भागधेयम्।।

नटी - (विचिन्त्य सनिश्वासम्) अय्य केसरावली किळ मह एक्काव बालदुहितदि उण एक्काइणी वञ्चअन्तो पच्छधिसेलु समल्लोगणिअ कहिं वि पळाइओ । कीसससा बराळिसा

(अत्र ग्रंन्थपातः।)

(नान्द्यां नट्याः अवशिष्टसम्भाषणप्रभृति)

तालपत्रे एकपत्रपरिमितः ग्रन्थपातः अस्तीति प्रतिभाति। लुप्तेऽस्मिन् भागे कवेः प्रवरादिकं परमानन्दभवनाख्यस्य श्रीमुष्णादिद्वयक्षेत्रास्य च प्रशस्तिर्भवेदित्यूह्यते।)

अय्य अंबुअवल्लीपरिणअ कारी खु सो कई।

(छाया) आर्य! अम्बुजवल्लीपरिणयकारी खलु स कविः।

(सशिरःकम्पम्)

ठाणे तस्स किदिसु अहिणिवेसो अय्यरासिआणम्।

(छाया) - स्थाने तस्य कृतिष्वभिनिवेश आर्यरसिकाणाम्।

सूत्रा - आर्ये किं बहुना। दिष्टया नाट्यविधौ विश्वातिशायिनः समुदिताः सर्वे गुणाः। पश्य -

वाणी तस्य कवेश्चतुर्मुखवधूःसङ्गीतभङ्गीसखी
सारज्ञा च सभा कथा च रुचिरा श्रीसत्यभामापतेः।
शृङ्गारश्च रसः शरच्च समयः शक्ताः प्रयोगे वयं
सर्वं तिष्टतु यत्सभापतिरयं श्रीभूवराहः स्वयम्।।

(नेपथ्याभिमुखमवलोक्य)

आर्ये, पश्यैष ते भागिनेयो मदिङ्गितज्ञः चोलमण्डलाधिपेन विजयधन्वना निजमनोरथलिप्सुना युधि निबद्धस्य पाण्ड्यमण्डलाखण्डलस्य महाराजकारिवसोरमात्यसिद्धयोगस्य बन्धनान्निर्गतस्य भूमिकामादाय इत एवाभिवर्तते। अनन्तशभिलाषितं वस्तु सम्पादयावः।

(इति निष्क्रान्तौ)

-प्रस्तावना-

****

(ततः प्रविशति सिद्धयोगः)

सिद्ध - (सनिर्वेदम्)

रक्षन्नेकातपत्रां धरणिमिह महाराजदिव्याज्ञयाऽहं
प्राशस्त्यं प्राप्य भूयःसपदि कृपणतां प्रापितो दैवगत्या।
लज्जानम्रीकृतश्च प्रभुजननिचये पश्यति क्लेशसीमा
चित्ते कृत्यं न किञ्चित्स्फुरति बत कथं चिन्तनीयं तदीयम्।।५।।

(सनिश्वासम्) हन्त नितान्तनिर्दयमेव दैवम्।

शक्तित्रायस्थिरतरोऽपि कथं स राजा
कारागृहं विजयधन्वपुरे गतोऽभूत्।
को वा निवारणपटुःसुहृदोऽपि दूरे
देवी तु सा कथमिनां शृणुयादवस्थाम् ।।६।।

(पुरोऽवलोक्य) कोऽयं वर्षवर इव महाराजस्य।

(ततः प्रविश्य वर्षवरः)

(वर्षवरः)- किस कहं सवदि दुवारअंगमि स्सम्।

(छाया)-कष्टं कथं सपदि द्वारकां गमिष्यामि)

(पुरो) हन्द रण्णासह चोकराअणिवद्धो वि कहं
एद्ध एको एव्व पाअचारी तत्थभवं अमच्छो।

(छाया)- हन्त राज्ञा सह चोलराजनिबद्धोऽपि कथमत्रैक एव पादचारी तत्रभवानमात्यः।

{उपसृत्य} जेदु अउअभवम्।

{छाया - जयत्वार्य भवान्।}

सिद्ध - अये माळव कुतस्त्वं त्वरितपदं गच्छसि।

माळव- अय्य देवीणिदेसादो।

(छाया)- आर्य, देवीनिर्देशात्।

सिद्ध -(सविमर्शम्) किमिति निर्दिष्टं तत्रभवत्या।

माळव - देव, जाणिज्जएखु णिअकुमारिआणिमिच्छं
णिहिलनिवाळकुमाळपडिच्छन्दअं संपादिअवदी तत्तहोदित्ति।

(छाया)-देव ज्ञायते खलु निजकुमारिकांनिमित्तं
निखिलनृपालकुमारप्रतिच्छन्दकं सम्पादितवती तत्रभतीति।

सिद्ध- अये माळव, किमत्र चित्रम्। अन्यदपि ज्ञायत एव।
तत्रापि द्वारकानाथप्रतिबिम्बावलम्बनात्।
तूलायापि न सा मेने भूपालान् भर्तृदारिका।।

माल- तर्हि विण्णादं दु एव्व खु रण्णे पडिण्णा जं।
दुवारआनाद एव्व मम कण्णकानाअ एत्ति ।

(छाया- तर्हि विज्ञाता एव खलु राज्ञः प्रतिज्ञा च।)

सिद्ध- अये जाने किं बहुना। तदारभ्य ननु देवीनिदेशात् पुण्यं चन्दनगिरिकन्दरमिति तत्रैव तमुद्दिश्य नित्यपूजां निर्वर्तयति भर्तृ दारिका। किञ्च तामभिलषन् केरलपतिः कामसेनो [1]ह्यवमानित एव महाराजेन।

यथा-

देव त्वदीयकन्याप्रतिकृतिदर्शनविभर्चित[2]:सुतराम् ।
दयनीयोऽयमिहेति द्वारवतीनाथेन याचितोऽहम् ।।

इति।

माल- भो भट्टिदारिआापडिकिदिदंसणं दुवारआणहस्स कहम्।

(छाया)- भो भर्तृदारिकाप्रतिकृतिदर्शनं द्वारकानाथस्य कथम्!।

सिद्ध- सा किल तद्देव्यैव क्वचिदर्थे कृतप्रतिज्ञया सत्यभामया चित्रपटे तस्मै दर्शितेत्यन्यदेतत्। ततस्ततः।

माल- किं अण्णम्। एत्थन्तरे जुत्तसण्णद्धं चोळेन्दं पडिचळिए महाराए कामसेणेण परं विळंभिअम्। आक्कन्दसअळदेसो णिअभटपटलेण बद्धरोसो सो अण्णेठुं वि पवुत्तो कण्णाए णिच्चपूअणट्ठाणम्।

(छाया)- किमन्यत्। अत्रान्तरे युद्धसन्नद्धं चोलेन्द्रं प्रति चलितेन महाराजेन कामसेनेन परं विजृम्भितम्। आक्रान्तसकलदेशो निजभटपटलेन बद्धरोषःसः अन्वेषितुमपि प्रवृत्तः कन्याया नित्यपूजनस्थानम्।}

सिद्ध- कष्टम् । तस्यापि लब्धोदुर्जनस्यावकाशः। ततस्ततः।

माल- अय्य किं भणिस्सम्। तस्सिं अवसरे तद्धलत्थरन्धेण केणचि तस्स जुत्तं घणं लत्तम्। जत्त सेळो वि कंविदो।

1.प्यवमानित

2. विभावितः

तदो वरं संभन्तेहिं जह जहं पलाइयोहिं परिअणेहिं णदिट्ठा भट्टिदारिआ कीरिसं अवत्थं अणुहोदिति ण याणिज एव्व। देव किं अवरं अदिकलुणं रंणो बन्धणं कण्णाआविरहं असमं एव्व सुणिअ हन्द मुच्छं गदा तत्तहोदी।

(छाया)- आर्य, किं भणिष्ये। तस्मिन्नवसरे तत्र लब्धरन्ध्रेण केनचित् तस्य युद्धं घनं लब्धम्। यत्र शैलोऽपि कम्पितः। ततः परं सम्भ्रान्तैः यथायथं पलायितैः परिजनैः न दृष्टा भर्तृदारिका कीदृशीमवस्थामनुभवतीति न ज्ञायत एव। देव किमपरमतिकरुणं राज्ञो बन्धनं कन्यकाविरहं च सममेव श्रुत्वा हन्त, मूर्छा गता देवी तत्रभवती।}

सिद्ध- {सनिश्वासम्}(विहस्य) हन्त, कथ माकस्मिकः प्रलयो लोकस्य। ततस्ततः।

मालव- तदो कंहं वि लद्धजीविदा देवीए दुं उत्तन्तं लेहपदं कढुअ मालअ सच्चभामासविहं सपदि गच्छेत्ति मं पेसिदवदी आसी।

(छाया)- ततः कथमपि लब्ध्जीविता देव्यै तद्वृत्तान्तं लेखपदं कृत्वा मालवसत्यभामासविधं सपदि गच्छेति मां प्रेषितवत्यासीत्।

सिद्ध- (निपुणं विमृश्य) उचितमहत्तरोऽयं सन्दर्भः। पश्य-

देव्या यतो भवति सा भगिनी कुमारी
तद्भ्रूविलासयमितः स च शाङ्र्गधन्वा ।
सोऽहं तमेव शरणं समुपेत्य शौरिं
जेतुं परं प्रथयितुं च विभुंप्रवृत्तः।।

अतस्त्वरितमेव गच्छावः।

{इति निष्क्रान्तौ}

।।मिश्रविष्कम्भः।।

(ततः प्रविशति सत्यभामादत्तहस्तो देवः यथार्ह परिजनश्च)

देवः - (सानुरागं विभाव्य)

तामिन्दुबिम्बवदनां
तरलाक्षीं हा कदा नु पश्येयम् ।
अपि दयिताकलवचनं
कथमपि मम कर्णपारिणीभूयात्।।

(देवीं विलोक्य)

आरभ्य चित्रापटदर्शनमायताक्ष्या-
मासक्तिमेत्य करभेरु ममान्तरङ्गम्।
उद्दिश्य मानिनि चिरेण तव प्रसादं
जागर्ति चिन्तयाति ताम्यति चाचलीति।।

देवी - (सखीं विलोक्य) अइ मन्दारिए पढेण किं णुलद्धम्। कामं पुरुसेण जीविदेण फलम्। जा हं सुउमारजणे दालुणकम्मेक्ककालणं जादा। हन्द, दल्लहं खु पडिण्णादम्। कुदो वउलमालिणी कुदो उण अहं। किं करोह्मि अज्जवि णागओ तद्ध पेसिदो जणो वि। सव्वदा विलंबेदि देव्वं अ।

(छाया)- अयि मन्दारिके, एतेन किन्नु लब्धम्। कामं पुरुषेण जीवितेन फलम्। याहं सुकुमारजने दारुणकर्मैककारणं जाता। हन्त! दुर्लभं खलु प्रतिज्ञातम्। कुतो वकुलमालिनी। कुतः पुनरहम्। किं करोमि। अद्यापि नागतस्तत्र प्रेषितो जनोऽपि। सर्वथा विलम्बते दैवंच। (अधोमुखी तिष्ठति)

मन्दा - देवि किदं अहिअअरं कादरदाए। आअयदा खु अह्म कच्छाअणी भअवदी। सपदि वासघरं गदुअतं पुच्छह्म। किं सच्चो भविस्सादि सङ्ग.रोत्ति।

छाया - देवी कुतं अधिकतरं कातरतया। आगता खल्वस्मत्कात्यायनी भगवती। सपदि वासगृहं गत्वा तां पृच्छाव: "किं सत्यो भविष्यति सङ्ग.र " इति}

देव: - (सप्रत्यभिज्ञम् देव्या॥श्चिबुकमुन्नमय्य)

सा किल विज्ञानवती सत्राजिज्जीवनिर्विशेषाया।

सर्वातिशायि तस्या: सर्वज्ञत्वं कृशाङ्गि जाने च ।।

तत्सपदि साधय संभावय ताम्।

(देवी सखीदत्तहस्ता निष्क्रान्ता)

देव: - (स्वगतम्) अद्य पुन: प्रकृतशेषं विचारयाम:।
(परिक्रम्य, आसने समुपविश्य, परिजनं विलोक्य)
प्रदोहल ततस्तत:।

दोहल:- देव भवते कुमारिकादानं प्रतिज्ञाय हृष्टमतीव महाराजकारिवसुना। तदनुपदमेव-

सप्रश्रयं स नृपति: सकलोपचारै:
संभाव्य मां परिजनेन सहैव देव्या:।
वैरोद्धतं विजयधन्वपुरं[1] विजेतु-
मारब्धवान्निजबलैरतुलप्रताप:।।

देव:- अहो देव्या मानसोद्वेग: यानिद्रमहमिव प्रतिपदं पाण्ड्यमण्डले परिजनं व्यापारयन्ती तिष्ठति।

दोहल:- (सस्मितम्) देव कस्यायमुपकार:।

---

1. धन्वनृपं

देव:- सत्यं, प्रतिज्ञा खलु प्राणेभ्योऽपि गरीयसी। अस्त्वेतत्। अये किंतद्वैरनिदानम्।

दोह- देव! ध्रुवं तत्कन्यकारत्नलिप्सया भवितव्यम्।

देव: - अहो कथन्नु जेतव्य: सपदि चोल राज:। भवतु नाम।

सम्प्रेषयामि सहसा सेनेशं सुचतुरं महासेनम्।
योऽयं सङ्ग.र रङ्गे. कल्पारम्भनट नाथतां वहति।

(स्मृतिमभिनीय) अये कथमिह स किल सोऽपि सत्राजित: साहय्ये नियुक्त: कदा पुनरागमिष्यति। अथवा अहमेव गमिष्यामि।

दोह- देव, तदपि श्रूयताम्

तस्य जित्वा रिपुं तस्मै सर्वस्वमपिशात्रवम्।
उपनीतं च तेनेति श्रुतं मार्गविशादिह।।

इत: क्षणादेव सर्व स्पष्टं भविष्यति।

देव:- (सहर्षम्) अप्रतिहतविजयो ननु महासेन:। समयश्चायं जैत्रयासमुचित एव।

यत्र किल-

धनप्रत्यूहमुत्सार्य जातो मित्रसमागम:।
करसङ्क्रान्तभूभृत्को राजा च सुखमाश्रयेत्।।

(नेपथ्ये वैतालिकौ)

जय जय यदुवंशदुग्धाब्धिराकाकलानाथ भो नाथ हे द्वारकानायक नयधनधन रुक्मिणीसत्यभामाकुचान्तर्लसकुङ्कुमक्षोदवक्ष:स्थल रिपुमदगजगण्डनोत्काण्ठितोद्दण्डकण्ठीरव प्रौढशृङ्गारमूर्ते हरे भवतु तव सुखाय भक्तौघरक्षामणे भासुर: सर्वत: शारदो वासर:।

देव:- (सहर्षम्) अवसरोचितमाचरितमेताभ्याम्।
वैतालिकयोरेक: - भो भो -

इह मधुपयुवान: सप्तपर्णप्रसून-
प्रमदवपनबालं दानमोहाद्भजन्ते।
निजरुचिबहुदृप्यजहंसाधिवास-
स्फुटतरपरिराजत्पुष्करा वासराश्च।।

अपर: - भो निशामयतु महदद्भुतमिदं माधुर्यपदम्।

सम्फुल्लासनसूनसन्ततिरजोराजीरुदारश्रिय:
कान्तानां कुचसीम्नि कुङ्कुमरसीकर्तुं भृशं कौतुकी।
मत्तेन्दिन्दिरमन्दरीकृतदलच्छुभ्रारविन्दच्छटा
सद्य:स्यन्दिमरन्दमिन्दुभरितो मन्दानिलस्स्पन्दते।।

दोहल:- देव सम्यगुपक्रान्तमेताभ्याम्। पश्य

उन्निद्रस्तबकानमत्तनुलता स्मेरारविन्दानना
सम्फुल्लोत्पललोचनेन मधुपान् संमोहयन्ती शनै:।
उद्भास्वच्छशिकान्तकुण्डलधरारम्भा समुच्छ्रायिनी
प्राप्ता भासुरराजहंसगमना प्रीत्या शरत्कामिनी।।

देव:- दोहल, सर्वथा मनोरथद्रुमदोहलतामुद्भावयसि।
(पुनर्वैतालिकौ)-

अहो अपरिमित सुखागम: खलु शरदागम:।

[1]धारागारविनिर्यदैन्दवसुधापूराति [2]दृप्तस्फुर-
ल्लीलालोलचकोरिकाचयकलालापाभिरामं निशि।
सौरोदारकराभिमर्शनसुखामोदाद्दिवापि स्फुटं
कोकिकाकलिकाद्भतं जगदिदं शब्दात्मकं जायते।।

1. धाराकार 2. दृप्त

(प्रविश्य) कञ्चुकी - स्वामिन्, स किल द्वारमधितिष्ठति सेनापतिः।

दोहलः - (सहर्षम्) अये सपदि प्रवेशय तम् ।

कञ्चुकी - यदादिशति। (इति निष्क्रान्तः)

(प्रविश्य महासेनः प्रणम्य बद्धाञ्जलिस्तिष्ठति)

देवः- (सबहुमानम्) भो धीर, स्वागतं भवते। अपि नाम चरितार्थस्तत्राभवान्महाराजः।

महासेनः - (सविनयम्) किमलभ्यं प्रसन्ने स्वामिनि दयाकारिणि।

देवः- अये कः पुनस्तस्य रिपुः? कथं च विजयः? सविशेषं श्रोतुकामोऽस्मि।

महा- स्वामिन[1], दयाकारिणि तदिह विज्ञापयामि। इह देवनिदेशात् तत्रा गते कयि "सन्मानयन् सपदि मां बहुधा स राजा, संप्रहिणोदथ रिपुं प्रति कामसेनम्।"

देवः- (आत्मगतम् विचिन्त्य) स खलु पुरा सत्यभामामि च्छन्नवधीरितः सत्राजिता।

दोहल- सखे, जानेऽतिदृढमतिमानुषस्ते व्यापारः। ततस्ततः।

महा - तदनु कदाचिदुदयति भास्वति मार्गवशान्मलयोपकण्ठमहं गतः। दिष्ट्या सोऽपि रिरंसुस्तमेव गिरिं गत इति लब्धा च प्रवृत्तिः। तदनुपदमेव

संवृत्तोद्वृत्तसिन्धुप्रबलतरलुठद्धोरवीचीविडम्बि,
प्रौढप्राचण्ड्यभीमैः प्रतिभटपटलीं गर्जितैस्तर्जयन्तः।
भेरीभाङ्कारबिभ्यद्धरिवरकपटाक्रन्दनीरन्ध्रनिर्य
द्धारानीरास्रपरं मलयगिरिवरं प्रापुरास्माकयोधाः।

---

1. न् तदिह

दोहल- वयस्य काकतालीयमेतत्।

महासे - ततः परं वेलातिलाङ्घि किमपि सङ्गरविजृम्भणम् यत्रा किल-

स्फुरत्कुलिशनिष्ठुरप्रखरखड्गसङ्घट्टन-
प्रभिन्नघनकङ्कटोच्चलदुरुस्फुलिङ्गोत्करैः।
बलौघजरजस्तमःप्रकरदन्तुराशान्तरं
नभःस्थलमिव स्थितं स्थगितमच्छतारागणैः।।

देवः - (दोहलं विलोकयति)

दोहल- स्वामिन्, तदेव ननु शौर्यम्, यत् तृणाय मनुते प्राणम्। अथ विनिहतेऽपि सैन्यवर्गे स्वयमेक एव रिपुः-

क्ष्वेलाभिन्ननभस्को हरिरिव गिरिकन्दरात्स निर्यातः।
प्रतिबलमथ निर्भीकः प्रतिजग्राह करवालसात्कर्तुम्।।

देवः - (सशिरःकम्पम्) साधु रे कामसेन!शूर श्लाघनीयोऽसि।

महा- अथ च -

छिन्दन् सेनां शतशः शान्तिं गमितःशनैः कथञ्चिदपि।
स रराज गिरेः शृङ्गे परिणततान्तः स्वपन् गजेन्द्र इव।।

देवः- अहह, कुलधर्मार्हमाचरितं क्षत्रकुमारकुञ्जरेण।

दोहल- (साश्चर्यम्) हन्त, कामसेनस्यापि कथमेतादृशी दशा।

महा- देव सावरोधापत्यन्तस्य सर्वस्वमपि मम पुरः सन्निधापितं सर्वतः समन्वेषणपरैः परिजनैः।

दोहलः - (निश्वस्य) पराधीना ननु परिजनाः।

देवः- (सानुशयम्) हन्त, बहुकरुणं पुनरीदृशं यदनाभर परिपीडनम्। ततस्ततः।

महा - *स्वामिन् "तदनु विपुलसेनस्तत्पदे तस्य पुत्रः*
सह निजपरिवारैः स्थापितः सानुतापम्।"

देवः- (सहर्षम्) अये दृढमुचितज्ञ एवासि।

दोहलः- सदृशं तत्प्रौढभावस्य यच्छरणागतसंरक्षणमिति।

ततस्ततः।

निरुपममथ शत्रोः कन्यकारत्नमेकं
जयफलमुपनीतं देव सत्राजितेऽपि।।

देवः- (सविमर्शम्) (आत्मगतम्) हन्त मदन्तरङ्गमुत्तरङ्गयति कन्यकारत्नमिति। (प्रकाशम्) ततस्ततः।

महा- देवतदनुतां कन्यकां तत्रभवान् सत्राजिदप्यनीनयत् कात्यायिनी योगिनीम्। अयमिह जनोऽपि स्वामिनः पुनर्निदेशमनुवर्तते च।

देवः- (सविमर्शम्) (आत्मगतम्) इयं किल सा भगवती ध्रुवमेतदपि कन्यकारत्नं देव्युपकण्ठमेव गतं भवेत्। (प्रकाशम्) अये, अस्तु, तां प्रति महाराज एव प्रमाणम्। परन्तु सर्वथा श्लाघनीयोऽसि।संप्रति पुनः-

"सपदि सकलसैन्यं साधु सन्नद्धमास्तां,
क्वचन विजययात्राकौतुकं मानसं मे।
अहमपि लघु गत्वा तावदन्तःपुरान्ताम्
सह सहचरवर्गैरद्य सज्जीभवामि।।

दोह- अये इदमेव परमसवरोचितं कर्म,

महा- (सहर्षोत्साहम्) भवतु यदादिशति स्वामी।

(इति निष्क्रान्ताः सर्वे)

इति श्रीमुष्णनगरनिवासि कौण्डिन्यकुलतिलकायमान श्रीमद्वीरवल्लीवरदनारायण गुरुवरतनय श्रीनिवास-विबुधमहागुरुकृतिषु वकुलमालिनीपरिणये ।

(प्रथमोऽङ्कः)

(अम्बुजवल्लीसमेताय श्रीवराहाय मङ्गलम्)

।।श्रीः।।

(अथ द्वितीयोऽङ्कः प्रारभ्यते)

(ततः प्रविशति कलावती)

कला- जावउज्जाणं गदुअदारिअं पेकिसस्सम्।
(छाया - यावदुद्यानं गत्वा दारिकां प्रेक्षिष्यामि)

(परोऽवलोक्य) इयं हि देवीए फिअसही।
(छाया)-इयं हि देव्याः प्रियसखी।)

(ततः प्रविशति मन्दारिका)

कला- (उपसृत्य) हला. अविण्णादचख्वे कुदो परंमुही गच्छसि।

(छाया- सख्यविज्ञातचरेव कुतः पराङ्मुखी गच्छसि।)

मन्दारिका - (निर्वर्ण्य) हा करङ्गवाहिणी देवीए पूआरम्भसोत्थि वाअणत्थं अह्म बह्मवेडिणं अण्णेसुं गआ सो कहिं हि गदोत्ति चिन्ताउलातुह उवालंभकालणं जादंह्मि।

(छाया-हा करङ्गवाहिनी देव्याः पूजारंभस्वस्तिवाचनार्थम-स्मब्दह्मवेदिनमन्वेष्टुं गता सकास्मिन्नपिगत इति चिन्ताकुला तवोपालंभकारणं जातास्मि।)

कला - अइ इदो एव्व सो मणिसालापरिसरंमि कच्चायिणीपि-असिस्साए मालिणीए सह चिरं किं वि मन्तयन्दो दिट्ठो। पुडं अज्ज देवपास्सं गदो भवे।

(छाया)- अयि इत एव सःमाणिशालापरिसरे कात्यायिनीप्रियशिष्यया मालिन्या सह चिरं किमपि मन्त्रयन् दृष्टः।स्फुटमद्य देवापार्श्वं गतो भवेत्।

मन्दा - अयि दाणिं देवो कि कमळाविळाससोहादो अअरन्तो एको एव्व दिट्ठो।

(छाया) - अयीदानीं देवोऽपि कमलाविलाससौधादवतरन् एक एव दृष्ट:।

कला - सहि किण्णिमित्तं अअं आरंभो देवीए।

(छाया) - सखि किंनिमित्तमयमारंभो देव्या:।

मन्दा-- अइ किं ण जाणेसि रुप्पिणीदेविअं वि अहरीकदुकामाए अह्मदेवीए अच्छविहारे देव्वं पडि,पडिण्णादम् ।

"जह जइमं जयइ भवं कलइस्से तुहतुकण्णआरअणम्। विजियो तुं जइअमए देहि मह हिअअ समहिदुंम् किं वि।। इत्ति।

(छाया) - अयि किं न जानासि रुक्मिणीदेवीम-प्यधरीकर्तुकामयास्मद्देव्याक्षविहारे देवं प्रति प्रतिज्ञातम्। यथा--

इह यदि मां जयति भवान्

कलयिष्ये तव तु कन्यकारत्नम्।

विजितस्त्वं यदि च मया

देहि मम हृदयसमीहितं किमपीति।।

कला-- सहि अच्चरिअं किं एदो जाणे। अदो खु पराजअविसण्णा देवी तिण्णमित्तं एव्व वउळमालिणिं द्दिसिअ परिअणमुहेण अअकारीवसुं अणुरञ्जअन्ती रत्तिंदेवं वि कच्चाइणीदुईआ किं वि मन्दअन्ती चिट्ठदि।

(छाया)- सखि आश्चर्य किमेतत् जाने। अत: खलु पराजयविषण्णा देवी तन्निमित्तमेव वकुलमालिनीमुद्दिश्य

परिजनमुखेनार्यकारिवसुमनुरंजयन्ती रात्रिं दिवमपि कात्यायनीद्वितीया किमपि मन्त्रयन्ती तिष्ठति।

मन्दा- अयि किं अण्णम्। ता एव्व जोइणीए अहिमदसिद्धिं उद्दिसिअ विण्णत्ता खु देवी।

(छाया)- अयि किमन्यत्। तयैव योगिन्याभिमत सिद्धिमुद्दिश्य विज्ञप्ता खलु देवी ।

यथा-

"आश्रितकल्पकवल्लीमर्चय कुसुमैरितो जगज्जननीम्।
सा किल सहसा निकटे घटयति तव देवि काङ्क्षितं लक्ष्मीः।।" इति

अदो अअंआरंभो तुमं कहिं पत्थिदासि।
छाया-अतोऽयमारंभः। त्वं कस्मिन्प्रस्थितासि।

कला- अहं वि आणत्तंमि देवीए। हञ्जे एक्काइणी एव्व मलअवदी भवणोज्जाणं पडि पेसिआ तुमंझडित्ति तहिं गच्छेत्ति।

(छाया - अहमप्याज्ञप्तास्मि देव्या " हञ्जे, एकाकिन्येव मलयवती भवनोद्यानं प्रति प्रेषिता त्वं झडिति तत्रा गँच्छे"ति।)

मन्दा- (निश्वस्य) हन्द, इअं अवरं विआरपदं देवीआ । जं मलअवई मलअवईत्ति रत्तिंदिवं रक्खिअदि देवादिट्ठि-पाआदो।

(छाया)- हन्तेदमपरं विचारपदं देव्याः यन्मलयवती मलयवतीति रात्रिंदिवं रक्ष्यते देवदृष्टिपातात्।

कला- अह्मणे सहि इत्थिआणं वि मोहणिज्जसोन्दरज्जा खु मलयवई णाम।

(छाया)- अहो सखि स्त्रीणामपि मोहनीयसौन्दर्या च खलु मलयवती नाम।

मन्दा- अह मुद्धे, अदो एव्व खु परिअणकम्मणियुत्तंअवि णिअजणएण दारिअं देवी। कदुअज्ज णिजावरजां अणिस्सादि अणुउणं वरं ताए।

(छाया- अयि मुग्धे अत एव खलु परिजनकर्मनियुक्तामपि निजजनकेन दारिकां देवी कृत्वाद्य निजावरजामन्विष्यत्यनुगुणं वरं तस्याः।

कला- सहि भविस्सदि किं मलअवदीए सरिसो पुरुसो।

(छाया)- सखि भविष्यति किं मलयवत्याः सदृशः पुरुषः।

मन्दा- सहि अलं एदेण विआरेण संवरणिज्जं खु अन्तउरकज्जं, जाहि सपदि वासगरं गदुय देवीणिदेसं अणुसरह्मि।

(छाया)- सरुयलमेतेन विचारेण। संवरणीयं खल्वन्तःपुरकार्यम्। याहि, सपदि वासगृहं गत्वा देवीनिदेशमनुसरामि।)

(इति निष्क्रान्ता)

कला- (सत्वरं भवनोद्यानं प्रविश्य पुराऽवलोक्य, सानन्दम्) अह्महे इदो एव्व लीलाकासारपेरंत बालवउलनिअटे इअं एक्काडणी मलयवदी।

(छाया)- अहो इत एव लीलाकासारपर्यन्तबालवकुलनिकटे इयमेकीकिनी मलयवती।)

(सविमर्श निर्वर्ण्य)

करणिहिएक्कवोलं
चिन्तामन्थरिअतारअच्छिजुअम्।
णीसासुच्चलणासा
मणिवअणं विदहई कहं वसइ।।

होदु, एद्ध निउज्जे खणमेत्तं णिलीणा से वअणविब्भमं पेक्खिस्सं दाव।

(छाया)-

करनिहितैककपोलं चिन्तामन्थरिततारकाक्षियुगम्।
निश्वासोच्चलनासा मणिवदनं विदधती कथं वसति।।

भवतु,अत्र निकुञ्जे क्षणमात्रं निलीनास्याः वचनविभ्रमं प्रेक्षिष्ये तावत्।)

(इति परिक्रम्य तथा करोति)

--प्रवेशकः

******

(ततः प्रविशति यथानिर्देशमुपविष्टा मलयवती)

मलय-(सास्रम्)

जादा जअप्पहिदकित्तिकुले कुलेहं
विस्सादिसाइणि जणे हिअअं विलग्गम्।
हा हा कहं परवहूपरिचारिअह्मि
देव्वं विसिंघलविइत्तगई पमाणम्।

(छाया)- *(जाता जगत्प्रथितकीर्तिकुले कुलेऽहं*
विश्वातिशायिनि जने हृदयं विलग्नम्।
हा हा कथं परवधूपरिचारिकास्मि
दैवं विशृङ्खलविचित्रगतिः प्रमाणम्।।)

(निश्वस्य) हा देव एव्वं मं रट्टीजणजम्मभाअणं करिअदाणिं एव्व विहअकम्माणि दिक्खिदस्स देसफलं जादं हि संविहाणम्।

(छाया)- हा देव एवं मां स्त्रीजनजन्मभाजनं कृत्वा हन्त दुर्लभजनेऽपि दृढं निहितजीवितां कृत्वेदानीमेव वृथाकर्मणि दीक्षितस्य,ते सफलं जातं हि संविधानम्।

(विचिन्त्य) हा माद सव्वहा वेसणमेत्तस्स भाअणं जादा खु एआरिसपुत्तिआपसवेण। हा ताद सव्वदा वि सच्चपडिण्णस्स,दे सङ्गरभङ्गकत्ती जादह्मि दुहिदा अह्मो कुदो तुमम्। कुदो णु दुल्लहत्थणा साहम्। कहिण्णु सो बहुवल्लहो महाभाओ। हन्द मह देवदापूअणं वि एव्वं पलम्मुहं जादम्।

(छाया) हा मात: सर्वथा व्यसनमात्रस्य भाजनं जाता खल्वेतादृशपुत्रिकाप्रसवेन । हा तात सर्वदापि सत्यप्रतिज्ञस्य ते सङ्गरभङ्गकर्त्री जातास्मि दुहिता। अहो कुतस्त्वम्। कुतो नु दुर्लभाभ्यर्थना साहम्। कस्मिन्नु स बहुवल्लभो महाभाग:। हन्त, मे देवतापूजनमप्येवं फलोन्मुखं जातम्।

(संस्कुतमाश्रित्य)

अयि योगिनि मामेवं गूढं कुत्रापि राजदाराणाम्।
बलिमिह परिकलयन्त्या: सफलो भवत् च तवापि
सङ्क.ल्प:।।

हा दाणिं अह्मकुलं विफणिदुं ण पारेमि जं
एआरिसकण्णआसंभेवेण लहुत्तणं जादम्।

(छाया)- हा इदानीमस्मत्कुलमपि फणितुं न पारयामि यदेतादृशकन्यकासंभवेन लघुत्वं जातम्।

कला-(साश्चर्य निश्वस्य) "अं तवस्सिणी णूणं महध्घकुलसंभवा।
कस्सिं अवि जणे कामं बद्धचित्त अतंमइ।।"

कीसकीत्ति किदवती तद्धहोदी अवि कच्चाइणी । हन्द, किं करेह्मि ण जाणह्मि कस्सिं से अणुराओत्ति।

(छाया)- इयं तपस्विनी नूनं महार्धकुलसम्भवा।
कस्मिन्नपि जने कामं बद्धचित्ता च ताम्यति।।

कष्टम् किमिति कृतवती तत्राभवत्यपि कात्यायनी। हन्त, किं करोमि। न जानामि कस्मिन्नस्यानुराग इति।

मल- (सनिश्वासं विहस्य) अह्मो किणु लद्धं एआरिसजीवणेण।
(छाया)- अहो किन्नु लब्धमेतादृशजीवनेन ।

(उरसि करं निधाय)

हह विहिपरिपाओ पेक्ख जादो पराओ
कहमिह महणाहो सच्चभामासणाहो।
सअमिह परिपुण्णो सो णुराओ विजिण्णो
विसिज हिअअ खेअं दे करिस्समोदम्।।

(छाया)-

ह ह विधिपरिपाक: पश्य जातो वराक:
कथमिह मम नाथस्सत्यभामासमेत:।
स्वमिह परिपूर्ण: सोऽनुरागो वितीर्णो
विसृज हृदय खेदं ते करिष्ये प्रमोदम्।।

(इति लतामाकर्षति)

कला-(सकौतुकविषादम्) अह्मोअह्म देवाभिकासिणी एव्व कल्लाणी। कहं एसा संपडि ण्व्विेदेण साहसिदुं पवट्ट इव्व।
(छाया)- अहो अस्मदेवाभिलाषिण्येव कल्याणी।
"कथमेषा सम्प्रति, निर्वेदेन साहसितुं प्रवृत्तेव "
(सत्वरमुपसृत्य) ठाणे सहि सोदामिणीए णीलमहाहिणिवेसो णाम।

(छाया) - "स्थाने सखि सौदामिन्या नीलमेघाभिनिवेशो नाम।"
(सविमर्श निर्वर्ण्य)

अइ सहि तुह णेतं हन्द राआदिमेत्तं

सजळकमळलीळं जाइ किं पेक्ख लोलम्।

वदइ कुचभवं दे वण्णिअं दावमन्दे

किसअरमवि तन्तं गत्तमच्चन्दकन्तम्।।

(छाया)- अयि साखि तव नेत्रं हन्त रागातिमात्रं

सजलकमललीलं याति किं पश्य लोलम्।

वदति कुचभवं ते वल्गितं तापमन्तें

कुशतरमपि तान्तं गात्रामत्यन्तकान्तम्।।

मल- (निश्वस्य स्वगतम्) इअं हि मे विस्संभभाअणं पिअसही।

(छाया)- इयं हि मे विस्रम्भभाजनं प्रियसखी।

(प्रकाशंम्)

अइ मालिणि देणाहं णिद्दासमआगदेण निव्वाजम्।

बहुअरमिह णिक्करुणं दइअ जणेणज्ज विप्पलंद्धम्मि।।

एहि सहि मालिणि किं करेमि फणाहि एक्काइणिं उझिअ कहिं णिगआसि।

(छाया)-अयि मालिनि तेनाहं निद्रासमयागतेन निर्व्याजम्।

बहुतरमिह निष्करुणं दयितजनेनाद्य विप्रलब्धास्मि।।

एहि सखि मालिनि किं करोमि फणैकाकिनीमुत्सृज्य कस्मिन् निर्गतासि।

(अश्रूणि प्रमृज्य, निर्वर्ष्य, सचकितम्)

हा हन्द कहं एसा कलावदी जादा । किं करेह्मि। विप्पलद्धम्मि अस्सुणाराए।

(छाया)- हा हन्त कथमेषा कलावती जाता।

किं कोमि, विप्रलब्धास्म्यश्रुधारया।

(सभयं स्तनावाच्छादयति)

कला- (आत्मगतम्) दिढं एदावपज्जन्त ठिअंएत्थमालिणीए।

(छाया)- दृढमेतावत्पर्यन्तं, स्थिमतत्रा,मालिन्या।

(प्रकाशम्) हला धण्णेमालिणीवच्छले किण्ण, होएद्धमि,दे अहं विस्संभभाअणम्।

(छाया)-सखि धन्ये मालिनीवत्सले किं न भवामि तेऽहं विस्रम्भभाजनम्।

(उरसि करं निधाय) अइ मुद्धे सच्चेण सवामि मा भआहि जाणाहि मस्सरीरन्तरेण मालिणी एव्व अज्ज तुमं एआरिसावट्ठं दंठूण णिव्वृणणिव्व मह मणं तुवरोदि विसेसेण तुह उत्तन्तं विण्णादुम्।

(छाया)- अयि मुग्धे, सत्येन शपे मा भैः जानीहि मां शरीरान्तरेण मालिन्येव। अद्य त्वामेतादृशावस्थां दृष्ट्वा निर्विष्णं मम मनस्त्वरयति विशेषेण तव वृत्तान्तं विज्ञातुम्।

मल-(स्वगतम्) दिढं सव्वं वि एदाए सुदं एव्व। हा किं करंह्मि। गोवणे उण कोवणा हविस्सदि। होदु णाम।

(छाया)- दृढं सर्वमप्येतया श्रुतमेव। हा किं करोमि। गोपने पुनः कोपना भविष्यति। भवतु नाम।

(प्रकाशम्)

अच्चरिअं किमिदं मे पाणंसमा वि पिअसहिहि सा होदि।

मुहदरूसणमारभिअ पडिअलमाहिअं करेइ जा पणअम्।।

(छाया)- आश्चर्य किमिदं मे प्राणसमा प्रियसखी हि सा भवति।

मुखदर्शनमारभ्य प्रतिकलमहितं करोति या प्रणयम्।।

(निश्वस्य) सुणाहि सहि मलअवदीए इत्थिआअणजम्मसोक्कम्।
अत्थि खु दाक्सणेसु पण्डमण्डलं णाम देसो।

(छाया)- शृणु सखि मलयवत्याः स्त्रीजनजन्मसौख्यम्।
अस्ति खलु दक्षिणेषु पाण्ड्यमण्डलं नाम देशः।

कला- (निपुणं विमृश्य) (स्वगतम्) दिढं इअं सा एव्व भवे अहवा कुदो णु सोदामिणिं अन्दरेण घणरज्जनो सोन्दरज्जम्।

(छाया)-दृढमियं सैव भवेत्। अथवा कुतो नु सौ दामिनीमन्तरेण घनरज्जनसौन्दर्यम्।

(प्रकाशम्) तदो तदो!

(छाया)- ततस्ततः

तस्स खु राआ मे पिदा।

(छाया)- तस्य खलु राजा मे पिता।

(बाष्पस्तम्भितकण्ठं तिष्ठति)

कला- अंहो वउलमालिणी किण्णु होदि।

(छाया)- अहो वकुलमालिनी किन्नु भवति।

(मलयवती-अधोमुख्यश्रूणि मुञ्चति)

कला- एहि भट्टिनि आलिङ्ग. मम्।

(छाया)- एहि भट्टिनि आलिङ्ग. माम्।

(परिष्वज्य) अह्महे कादव्वं एव्व किदवदी भअवदी।

(छाया)- अहो कर्तव्यमेव कृतवतीभगवती।

(सहर्षम् अश्रुप्रमृज्य) अइ कुदो मळअवदित्ति णाम दे जादम्।
(छाया)- अयि कुतो मलयवतीति नाम ते जातम्।

मल- सहि भअवदी विइंभिअं सव्वं वि।
(छाया)-सखि भगवतीविजृम्भितं सर्वमपि।

कला- अइ किं उद्दिसिअ।
(छाया)-अयि किमुद्दिश्य।

मल- सहि तं किं वि ण आणे। आणत्तं हि केवलं पिअसहीए मालिनीए जह। माभण सहि उत्तन्तं विणा भअवदिं दु राअदाराणं एत्थव्व तदादि सइट्ठं पच्चुअकलणे करेइ सव्वं सा''।। इत्ति ।

(छाया)- सखि तत्किमपि न जाने । आज्ञप्तास्मि केवलं प्रियसख्या मालिन्या। यथा -

मा भण सखि वृत्तान्तं
विना भगवतीं तु राजदाराणाम्।
अत्रैव तदादिशतीष्टं
प्रत्युत कलने करोति सर्वं सा ।। इति।

कला- (स्वगतम्) "किणु मेणे भअवदी णाहिदं दु करिस्सदि''।
(छाया)-किन्नु मेने भगवती नाहितं तु करिष्यति

(प्रकाशम्) अह्मो
सहि, "तदा,संवरणिज्जं तज्जदो स,जोइणी मणम्''।।
(छाया)- अहो सखि, "तदासंवरणीयं तद्यत:सा योगिनीमन:''।।

(सभ्यर्थनम्) सहि होदु सव्वं फुडं भविस्सदि दाव। अज्ज उण तुह सिवणअउत्तन्तं सोदुकामाह्मि।

(छाया)- सखि भवतु, सर्वं स्फुटं भविष्यति तावत्। अद्य पुनस्तव स्वप्नवृत्तान्तं श्रोतुकामास्मि।

मल- (स्वगतम्) हन्द अस्सुधाराए खु परं वंजिअह्मि।
(छाया)-हन्ताश्रुधारया खलु परं वञ्चितास्मि।

(प्रकाशम्) सही एव्व मे विस्संभभाअणम्। सुणाहि सहिअसुलहजणाहिणि वेसेण दाणिं बलिअं किलयामि।
(छाया)-सख्येव मे विस्त्रम्भभाजनम्। शृणु सखि, असुलभजनाभिनिवेशेन इदानीं बलवत्कलमामि।

कला- (सस्मितम्) जाणे फुडमयि होदी जावअणाहेक्कवल्लहासित्ति।
(छाया)-"जाने स्फुटमयि भवती यादवनाथैकवल्लभासिति।।"

(चुबुकमुन्नमय्य)
अविदूरे सहि सोअं वसई परं तुह कए ण णिद्दाइ ।
(छाया)- अविदूरे सखि सोऽयं, वसति परं तव कृते न निद्राति।।

मल- (सहर्षम्) सहि कुदो णु साहं, कहिण्णु बहुवल्लहो महाराओ। एव्वं एव्व भणादि पडिपदं मालिणीविअ पिअसही।
(छाया)- सखि, कुतो नु साहम्। कस्मिन्नु बहुवल्लभो महाराजः। एवमेव भणाति प्रतिपदं मालिन्यपि प्रिय सखी।

(सकौतुकम्) सहि सुणाहि मे हिअअं।
(छाया)-सखि शृणु मे हृदयम्।

णाहं तस्स समीवदेसवळनं वंछंमि णो भासणं
कण्ठासेससुहं णआहरसुहं संभोअवट्टी अवि।
तं सव्वं सहि मे करिस्सदि कदा देव्वं ण आणे परं
सिद्धं संपडि तस्स दंसणकळामेत्तं भवे किं भण।।

(छाया)- नाहं तस्य समीपदेशवलनं गच्छामि नो भाषणं
कण्ठाश्लेषसुखं न चाधरसुधां सम्भोगवार्तामपि।
तत् सर्व सखि मे करिष्यति कदा दैवं न जाने परं
शीघ्रं सम्प्रति तस्य दर्शनकलामात्रं भवेत्किं भण।।

कला- (स्वगतम्) दिढं इअं इमं दुवारएत्ति ण जाणादि एव्व।
(छाया)-दृढमियमिमां द्वारकेति न जानात्येव।

(प्रकाशम्) अइ धण्णे खणमेत्तेण एत्थ एव्व पेक्खिस्ससि तुह पाणणाहम्।
(छाया)- अयि धन्ये क्षणमात्रोणात्रैव प्रेक्षिष्यसि तव प्राणनाथम्।

मल- (सविमर्शम्) (आत्मगतम्) सव्वहा इअं एव्व दुवारआ भवे।
(छाया)-सर्वथेयमेव द्वारका भवेत्।

(प्रकाशम्) सहि होदु किं किं भविस्सदि पेच्छह्म।
(छाया)-सखि, भवतु किं किं भविष्यति, पश्यामः।

कला- सहि, दाणिं वि मे पण्णुत्तरणं ण दिदिण्णं एव्व।
(छाया)-सखि, इदानीमपि मे प्रश्नोत्तरं न दत्तमेव।

मल- सुणाहि सुणाहि।
(छाया)- शृणु शृणु।
(संस्कृतमाश्रित्य)

एवं विचारविवशा क्षणमत्र स्थितास्म्यहम्।
आलिङ्ग्यात्रान्तरे निद्रा ममर्जाश्रु सखीव मे।।
तदो को णु विसुवणो दिट्ठो।
(छाया)-ततः को नु विस्वप्नः दृष्टः।

कला- कहं कहं सहि।
(छाया)- कथं कथं सखि।

मल- (सगद्गदम्)
तम्मपण्णीतडे दिठ्ठा णअरी सहि तारिसी।
जाए मन्दाइणीतीरवासिणी पडिमा पुरी।।
(छाया)- ताम्रपर्णीतटे दृष्टा नगरी सखी तादृशी।
यस्या मन्दाकिनीतीरवासिनी प्रतिमा पुरी।।

कला - आह णिउणे जुज्जइ दे णअरीए।
(छाया)- अयि निपुणे युज्यते ते नगर्याः।

मल- तदो णु।
कीडावणे मह घणे कणिसोहमूले
लीलाघरं ललिअमञ्चअसोहि दिट्ठम्।
(छाया)- ततो नु ।
कीडावने मम घने मणिसौधमूले
लीलागृहं ललितमञ्चकशोभि दृष्टम्।
कला- सहि सरिसं देसोभग्गस्स। तदो तदो।
(छाया)-सखि सदृशं ते सौभाग्यस्य। ततस्ततः।
मल-(निश्वस्य)
सल्लावसाअरसही सहिदा कहंचि

तद्ध ट्ठिअह्मि सइदा दिवसं विणेदुम्।

(छाया)- *सल्लापसादरसखीसहिता कथञ्चित्*

तत्र स्थितास्मि शयिता दिवसं विनेतुम्।।

कला- हन्द सहि तदावि दुल्लहा खु दे अह्मदेवविरहवेअणा। किंअण्णं इ समाणुराआसि दे वल्लहस्स। तदो तदो।

(छाया)-हन्त सखि, तदापि दुस्सहा खलु ते अस्मद्देवविरहवेदना। किमन्यत्। अयि समानुरागासि ते तव वल्लभस्य। ततस्ततः।

मल- (स्वगतम्) अवि णाम तह भवे। {हवे}

(छाया)- अपि नाम तथा भवेत्।

(प्रकाशम्)- (सरोमाञ्चम्) एद्धन्तरे

इन्दीवरज्जुइ विडंबिबिलंबपिच्छं

बिम्बाहरं भुवणमोहणमन्दहासम्।

कण्णादिलंघिणअणं कणअंबरिल्लं

लाअण्णधाम सहि किञ्चण धाम दिट्ठम्।

(छाया)- अत्रान्तरे -

इन्दीवरद्युतिविडम्बि विलम्बिपिच्छं

बिम्बाधरं भुवनमोहनमन्दहासम्।

कर्णातिलङ्घिनयनं कनकाम्बराढ्यं

लावण्यधाम सखि किञ्चन धाम दृष्टम्।।

कला- अइ धण्णे, यहि असंसअं तुह पाणवल्लहो एव्व दिट्ठो। तदो तदो।

(छाया)- अयि धन्ये सखी, असंशयं तव प्राणवल्लभ एव दृष्टः। ततस्ततः।

TAMIL NADU STATE DEPARTMENT OF ARCHAEOLOGY LIBRARY 9941/-

मल- सहि अहं वि तहव्व णिद्धारिअ सभअं मञ्चादो ओअरिअ लज्जाए सहिं आळिंगिअ ट्ठिअंमि। तदो णु।

(छाया) सख्यहमपि तथैव निर्धार्य सभयं मञ्चादवतीर्य लज्जया सखीमालिङ्ग.च्य स्थितास्मि । ततो नु।

(सेस्कृतमाश्रित्य)

चञ्चलकुण्डलगण्ड: शनकै:1 सविधं समेत्य सानुनयम्।
मा कुरु मानमयीति स्मितमधुरं मदधरे करं विदधे।।

कला- (सस्मितम्) तदो तदो।

(छाया)-ततस्तत:।

मल- *तदो मं भयसण्णाहकंपिओरुजुई अवि।*
एक्कं उज्झित्ति णिक्कन्ता लहुणिक्करुणं सही।।

(छाया)- ततो मां भयसन्नाहकम्पितोरुयुगीमपि।
एकामुत्सृज्य निष्क्रान्ता लघु निष्करुणं सखी।।

कला-(सशिर:कम्पम्) अइ सा खु सहि जा डइङ्गि.अं जाणदि तदो तदो।

(छाया)-अयि सा खलु सखी या इङ्गि.तं जानाति। ततस्तत:।

मल- सहि तदो वरं वेलादिलंघिअं किं वि।

(छाया)- सखि तत परं वेलातिलाङ्घ्तं किमपि।

कला- कहं कहम्।

(छाया)-कथं कथम्।

मल-(संस्कृतमाश्रित्य)

मामालिङ्गि.य बलाच्छनैरनुनयन् मन्दस्मितैर्वञ्चयन्।
मध्ये धाम मुखे मुखं च घटययन् पर्यङ्क.तल्पं गत:।

(अधोमुखी तिष्टति)

कला- किंदं सहि काआरिएण। दे हिअअस्सवि गोवणं कहोहि कहेहि।

(छाया)-कृतं सखि कातर्येण। किं ते हृदयस्यापि गोपनम्। कथय कथय ।

मल- (सलज्जास्मितम्)

नीवी मे गलिता स्वयं तदधरीकृत्याधरं पीडितुं
निर्लज्जं तदुदरस्थलीमहमिता हा हन्त निद्रा गता।।

ण दिट्ठा पासट्ठिआ माळिणी पिअसही।

(छाया)-न दृष्टा पार्श्वस्थिता मालिनी प्रियसखी।।

(चेलाञ्चलेन नेत्रे प्रमार्ष्टि)

कला- (स्वगतम्) अहो मिअतिह्णाए परं वंचिआ,मिई।

(छाया)-अहो मृगतृष्णया परं वञ्चिता मृगी।

(प्रकाशम्) अइ सुहोदक्क एव्व दे सिवणिओ जादो। सहि मा भआहि इदो खणेण मालिणी आअमिस्सदी। दिट्ठा मए वि अज्ज मज्झेमग्गम्।

(छाया)-अयि सुखोदर्क एव ते स्वप्नो जातः। सखी मा भैषीः। इतः क्षणेन मालिन्यागमिष्यति। दृष्टा मयाप्यद्य मध्येमार्गम्। तदो वरं सिग्घं एव्व पेक्खिस्सत्यि दे पाणनाहम् । (छाया) ततः परं शीघ्रमेव पेक्षिष्यसे ते प्राणनाथम्।

मल- (सहर्षम्) (आत्मगतम्) दिढं इदं एव्व मे वल्लहट्ठाणम्।

(छाया)-दृढमिदमेव मे वल्लभस्थानम्।

(प्रकाशम्) किं अण्णं सहि द,वअणं एव्व पमाणम्।

(छाया)- किमन्यत्। सखि, तं वचनमेव प्रमाणम्।
(ततः प्रविश्य पटाक्षेपेण)
मालिनी- (श्रवणमभिनीय पुरोऽवलोक्य, सचकितम्)
"कहं एसा वि जाणादि सव्वं एदं कलावदि।
(छाया)-"कथमेषापि जानाति सर्वमेतत्कलावती।"

(विचिन्त्य)
सुलहाअ वसीकादुं सत्तं सव्वस्स साहणम् ।।
(छाया)-सुलभाय वशीकर्तुं सत्यं सर्वस्य साधनम्।।

(उपसर्पति)
कला- (सस्मितम्) एहि सहि मालिणि जीवेहिणम्।
(छाया)-एहि सखि मालिनि जीवयैनाम्।

मालि-(सनिश्वासंम्,उपविश्य) (स्वगतम्)
दिढं इयं से उत्तन्तं सव्वं जाणादि एव्व जदो से इङ्गि.दं असइ। होदु णाम।
(छाया)-दृढमियमस्या वृत्तान्तं जानात्येव यतः सेयमिङ्गि.तं जानाति। भवतु नाम।

(प्रकाशम्) सहि जाणासि खु किं करेह्मि अप्पणो ण प्पहवामि।
(छाया)-सखि जानासि खलु। किं करोम्यात्मनो न प्रभवामि।
कला- (सविमर्शम्)
एसा तवस्सिणी सच्चा अह्माणं पत्थणापलम्।
किण्णु मेणे भअवई णाहिदं दु करिस्सदि।।
(छाया)-एषा तपस्विनी सत्यादस्माकं प्रार्थनाफलम्।
किन्नु मेने भगवती नाहितं मु करिष्यति।।

मालि-(स्वगतम्) पट्ठं जादं खु मे तक्किदम्।
(छाया)-स्पष्टं जातं खलु मे तर्कितम्।

(प्रकाशम्) अत्थि कालणम्।
(छाया)-अस्ति कारणम्।

कला- कहं विअ।
(छाया)-कथमिव।

मालि- (कर्णे कथयति)
कला- अइ तरिहि दाणिं तंमन्तीए से किं करेह्म।
(छाया)-अयि तर्हीदानीं ताम्यन्त्याः अस्याः किं कुर्मः।

मालि- हला तण्णिमिच्चं अवि चि न्तिओ उवाओ।
(छाया)- सखि, तन्निमित्तमपि चिन्तित,उपायः।

कला- (सामोदम्) कहं कहं सहि।
(छाया)-कथं कथं सखि।

मालि- हला एद्धएआरिसावत्थाए से सिसिरोवअरणाइं आणेदुं अन्तेउरं गदाए मए मज्झेमग्गं दिट्ठिआ दिट्ठो अह्मपुरोहिदो बह्मवेदी।
(छाया)-सख्येतादृशावस्थाया अस्याः शिशिरोपचरणान्यानेतुमन्तःपुरं गतया मया मध्येमार्ग दिष्ट्या दृष्ट अस्मत्पुरोहितो ब्रह्मवेदी।

कला-(स्मृतिमभिनीय) जाणे सहि मणिसालापरिसरंमि खु देण सह तुए मन्दिदम्।
(छाया)-जाने सखि मणिशालापरिसरे खलु तेन सह त्वया मन्त्रितम्।

मालि- अह इम्।

(छाया)-अथ किम्।

कला-. अच्चरिअं किं सहि तुह चउस्तणस्स। फलिदं एव्व चिन्तिदं मलअवदीए। अह्मदेवस्सवि।

(छाया)-आश्चर्य किं सखि तव चतुरत्वस्य। फलितमेव चिन्तितं मलयवत्या: अस्मद्देवस्यापि।

मल-(सहर्षम्)(स्वगतम्) अह्महे इअं एव्व दुवारआ णूणम्।

(छाया)-अहो इयमेव द्वारका नूनम्।

मालि- सहि गोवणिज्जो सव्वहा एसो उत्तन्तदो देवीए सआसदो।

(छाया)-सखि गोपनीय: सर्वथैष वृत्तान्तो देव्या:,सकाशात्।

कला- कहं सहि अत्ताणं वि ण विस्ससिस।

(छाया)-कथं साखि आत्मानमपि न विश्वससे।

मालि- सहि हला कलावदी णं होदी दाणिं दाव देवीणिदेसं अणुसरह्म।

(छाया)-सखि कलावती ननु भवती। इदानी तावद्देवीनिदेशमनुसराव:।

(उत्थाय सर्वा: कुसुमापचयं नाटयन्ति)

***

(तत: प्रविश्य)

विदूषक:- (सोत्साहम्) अहो फलिअं मे वग्गिदं जं दाणिं वउळमाळिणी उत्तन्देण देवं जीवयआमि।

(छाया)-अहो फलितं मे वल्गितं यदिदानी वकुलमालिनीवृत्तान्तेन देवं जीवयामि।

(पुरोऽवलोक्य) ही ही इदो खु कमलाविलाससोहादोफुडपुण्डरीअ धमा किसमुत्ती खलिअमाणसो सोअम्। ओदरिअ राअहंसे कलवअणे लसगई कहंचिअवि।।

(छाया)-ही ही इतः। खलु कमलाविलाससौधात्स्फुटपुण्डरीक-
धामा कृशमूर्तिस्स्खलितमानसः सोऽयम्।
कलवचनोऽलसगतिः कथञ्चिदपि।।

ताएत्थ खणं णिवसह्मि।
(छाया)-तस्मादत्र क्षणं निवसामि।

(सौधमूले तिष्ठति)

(ततः प्रविशति कामयमानावस्थो देवः)

देवः-(विभाव्य)
कथमिह वनितां तां हन्त पश्यामि कान्तां
छलयति हतदैवं तीव्र[1]मज्ञानभावम् ।
प्रतिनिधिकृतचिन्ता बाधतेऽसौ निरन्ता
मदयति मम चेतः पातकी मीनकेतुः ।।
(साशङ्कं. विचिन्त्य)
कदाहं कान्तायाः कुचयुगलमालिङ्ग्य सुदृढं
शनैः सान्त्वालापैः चलनयनमुन्नम्य वदनम्।
कपोला वाजिघ्रन् कथमहह पास्यामि सुचिरं
मुखामोदं गृह्णन् मधुरमधुरं स्मेरमधरम्।।

(अवरोहणं नाटयन् सनिर्वेदं निश्वस्य)
कथं तामेणाक्षीं बहुतरमिहोत्प्रेक्ष्य किमलं
प्रमाथी सन्तापः प्रविसरति कोऽपि प्रतिकलम्।
न दत्ते मेऽभिज्ञामपि सविषयं बाह्यकरणं
मनश्चिन्तानत्यादतिचपलमन्तर्भ्रमति च ।।
(पुरोऽवलोक्य) अयमितो वयस्यः।

1. तीव्रदुर्ज्ञान

(उपसृत्य) विदूषकः - भो देव दाणिं किं अच्चन्दं मन्दिर तम्मसि।

छाया-भो देवेदानीं किमत्यन्तं मन्दिरे ताम्यसि।

देवः-सखे, श्रूयतामिदानीं व्यासज्यवृत्ति मे जातं चेतः।

विदूष- कहं कहं देव ।

(छाया)- कथं कथं देव।

देवः- सोऽहं सौधाग्रमारूढो चिन्तयन् दूरवासिनीम्।
भवदागमपर्यन्तं कालं नेतुं कथञ्चन।।

विदूष-(स्वगतम्) कहण्णु दूरवासिणी होई ।

(छाया)-कथं नु दूरवासिनी भवति।

प्रकाशम्- तदो तदो।

(छाया)-ततस्ततः।

देवः- तदनु तत्र वातायनमाश्रित्य पर्यन्तेषु वलमानदृष्टिः स्थितोऽस्मि। ततः खल्वन्तःपुरपरिसरे-

दृष्टा काचिददृष्टपूर्वसुषुमा सौन्दर्यसीमा नु किं
मूर्ता मोहकला किमैन्दवकला लावण्यलक्ष्मीरुत।
चेतो हन्त तदा सखे मम चिरं निश्चेष्टितं विस्मया-
दानन्दादवशं मदेन चपलं प्रेम्णा परं निर्भरम्।

तदनु तस्याः पुनः कस्मिन्नपि पुण्य शालिनि भावबन्धमुपलक्षितवानस्मि ।

पश्य

तनुं धत्ते तान्तामलसमलसं याति यदसौ
कपोलौ कल्याणी वहति विकसत्कैतकरुचौ।
नखैर्भूयो भूयः किरति नयनाम्बूनि रुदती
नितान्तं पश्यन्ती दिशि दिशि दृष्टिं दिशति च।।

मन्दमन्दमथ कयाचन सहान्त:पुरोद्यानं प्रविवेश च ।

विदूष- (स्वगतम्) दिढं अअं तां एव्व दिट्ठवन्तो आसी।

(छाया)- दृढमयं तामेव दृष्टवानासीत्।

(प्रकाशम्) देव तरिहि पलिअंचिरेण दिग्घदिग्घेहिं दे लोअणेहिम।

(छाया)- देव तर्हि फलितं चिरेण दीर्घदीर्घाभ्यां ते लोचनाभ्याम्।

देव:- (सानुरागम्) शृणु सखे पारमार्थिकम्।

कण्ठे बाहुलतां मुखे निजमुखं गाढं कुचौ वक्षसि
श्रोणीषूरुयुगेऽधरेऽधरदलं निक्षिप्य निक्षिप्य च।
प्रेम्णा साधु तया मुदा लघु बलादालिङ्ग्य यश्चुम्ब्यते
सोऽयं धन्यतम: किमन्यदखिलं तत्पादमग्नं जगत्।।

विदू - (साट्टहासम्) देव किं अण्णम् घट्टकुट्टीए पहादम्। सा खु तुह एव्व धण्णत्तसेपादइत्ता जादा। पेच्छ,आणत्तं खु तुए अन्तउरकज्जं विआरिदुम्। मज्झेमग्गं एव्व मए सव्वं विण्णादम्।

(छाया)- देव, किमन्यत्। घट्टकुट्यां प्रभातम्। सा खलु तवैव धन्यत्वसम्पातृका जाता। पश्य, आज्ञप्तं खलु त्वयान्त:पुरकार्थं विचारयितुम्। मध्येमार्गमेव मया सर्वं विज्ञातम्।

देव:- (सहर्षम्) अये किमाश्चर्यम्। ब्रह्मवेदी ननु भवान्। कथं कथय।

विदू- (उपविश्य) देव किं बहुणा। एसा सा एव्व देपाणदइआ महाराअकारिवसुणन्दिणी दाणिं मलअवदी होदिअ चिट्ठदि।

(छाया)- किं बहुना। एषा सैव त प्राणदयिता महाराजकारिवसुनन्दिनी इदानीं मलयवती भूत्वा तिष्ठति।

देव:- (साश्चर्यम्) अये प्रियवयस्य,

हृदयं विशयं धत्ते तादात्म्यं वहति चाद्य तन्वङ्ग्याम्।
अपि नाम भवेदेवं कथमियमाकस्मिकी सुधाधारा।।

विदू- देव, किं ण जाणेसि कच्चाइणी कदंबिणीम्।
(छाया)- देव, किं न जानासि कात्यायनी कादम्बिनीम्।

देव:- (निपुणं विमृश्य) (आत्मगतम्)

श्रुतमेव ननु दोहलमुखान्मलयाचले सा नित्यपूजां निर्वर्तयन्ती स्थितेति।

(प्रकाशम्) सखे, किमियं महासेनोपनीतं महाराजसत्राजितो विजयफलम्।

विदू- अह इम्?
(छाया)- अथ किम्?

देव:- (सानन्दम्) अये सा किल नाम्ना मलयवतीति प्रत्यपादि कथम्?

विदूष- तंहि जोहिणीकिदं संवरणं जाणीहि।
(छाया)- तद्धि योगिनीकृतं संवरणं जानीहि।

देव:- (सविमर्शम्) सखे,

"तादृशी किल सा देव्या भृशं प्रियकनीयसी।
किन्तु मेने भगवती नाहितं तु करिष्यति।।

विदू- अत्थि कालणम्।
(छाया)-अस्ति कारणम्।

देव: वयस्य कथमिव।

विदूष- देव, जाणिज्जये खु अच्छविहारे सच्चभामाए संकप्पो जं देवीं अविरुप्पिणी अअरीकरेमि पणवन्धेणेत्ति।

(छाया)- देव ज्ञायते खलु अक्षविहारे सत्यभामाया: सङ्क. ल्प: यद्देवीमपि रुक्मिणीमधरीकरोमि पणवन्धेनेति।

देव:- सखे, तदा खलु जाने-

सा मे देवी सहसितं मानपर्याकुलामिमाम्।
अयि ते भद्रमित्युक्त्वा गतैव निजमन्दिरम्।।

विदू- तदो एव्व खु पराजओ एदाए जादो।

(छाया)- तत एव खलु पराजय एतस्या जात:।

देव:- किमत्र चित्रम् । तत्प्रसाद एव हि सर्वत्रसम्पदमावहति।

विदू- देव किं अण्णम्, अदो एव्वं संवरणपुव्वं पूजणेण दे पहाणदेवीपसादं उद्दिसिअ हिदेसिणीए जो इणीए आणत्ता देवी सच्चभामा।

(छाया)- देव, किमन्यत्, अतएवं संवरणपूर्व पूजनेन ते प्रधानदेवीप्रसादमुद्दिश्य हितैषिण्यायोगिन्याज्ञप्ता देवी सत्यभामा।

(संस्कृतं आश्रित्य)

आश्रितकल्पकवल्लीमर्चय कुसुमैरितो जगज्जननीम्।
सा किल सहसा निकटे घटयति तव देवि काङ्क्षितं लक्ष्मी:।।

इति

देव- अये चित्रम्। संज्ञाविशेषेण सापत्यशङ्क.ामाच्छादितवती भगवती। अस्त्वेतत्। कथमिदानीमेकाश्रयाश्रययोरपि महानयमन्तराय:। पश्य -

देव्या हितैकहृदयाजनि योगिनीयं
चेतस्तु चञ्चति चिरायति चात्मदैवम्।
का,मे गतिः कुटिलचापकरे च कामे
सोमे च सायमुदयत्यह भीमभीमे।।

विदू-देव, मा भआइ, दाणिं सा दे पाणवल्लहा एक्काइणी एव्व भवणुज्जाणं पविट्ठा चिट्ठइ।

(छाया)-देव,मा भयीषिः {भैषीः}, इदानीं सा ते प्राणवल्लभा एकाकिन्येव भवनोद्यानं प्रविष्टा तिष्ठति।

सा तुह गई।

(छाया)-सा तव गतिः।

देवः-(सहर्षम्) सखे, कथमिदं विचारितम्।

विदू-देव, चिट्ठइ खु मे ·हिअअंमालिणी।

(छाया)-देव तिष्ठति खलु मे हृदयं मालिनी।

देवः- अये, ध्रुवमेषा सर्व जानाति । प्रियशिष्या किल सा भगवत्याः। ततः किं नु कथितवत्यासीत्।

विदू- देव किं अवरम्। देवीए लच्छीसमाराहणपुप्फणिमिच्चं भवणुज्जाणं पडि पेसिआ सा तवस्सिणी देवदंसुणुक्कण्ठाए अच्चन्दं तम्मई चिट्ठदि। तद्ध सिद्धं एव्व कहं वि एक्काइणं देव पवेसिहित्ति मं भणिअ दाणिं भवणुज्जाणं एव्व पविट्ठा।

(छाया)-देव,किमपरम्। "देव्या लक्ष्मीसमाराधनपुष्पनिमित्तं भवनोद्धानं प्रति प्रेषिता सा तपस्विनी देवदर्शनोत्कण्ठया अत्यन्तं ताम्यती तिष्ठति। तत्र शीघ्रमेव कथमपि एकाकिनं देवं प्रवेशय इति" मां भणित्वा भवनोद्यानमेव प्रविष्टा।

देव:- (स्मृतिमभिनीय) (स्वगतम्) सैव द्वितीया भवेत्।
(प्रकाशम्) (साश्चर्यानन्दम्) अये सर्वथा मय्येव विहितपक्षपातया तथैव भगवत्या मन्त्रितमित्थं भवेत्।
अन्यथा कथमर्हति मालिनी स्वातन्त्र्यम्।
विदू:- को उण संसओ।
(छाया)-क:पुन:संशय:।

देव:-(सकौतुकम्) अस्तु सखे, कथं तत्र गन्तुमुपाय:।
विदू- अत्थि खु सुरग्गमुहम्।
(छाया)-अस्ति खलु सुरङ्गामुखम्।

देव:- युक्तमनुचिन्तितं वयस्येन।
(सह विदूषकेनोद्यानं प्रविश्य पुरोऽवलोक्य) सखे, इह हि

सम्फुल्लाखिलवल्लरीप्रविसरन्मारन्दबिन्दूद्भव
त्कुल्यापूर्णतरालवालकलिताकुल्यामराराभत:।
नीरन्ध्रद्रुमकुञ्ज पुञ्जनिबिडालीलावनाली मुहु:
मत्तेन्दिन्दिरसुन्दरीकलरवै: मोहं विधत्ते मयि।।

विदू:- देव एद्ध किं करेह्म। कहं उण अच्चन्दसन्दनीरन्ध्रणाणाविहतरु गणसूणाणंमिणिव- हणिरन्तरमहुरमहुरसमदचवल चवलाणं उम्मत्तभमराणं कळझंकारकोलाहलेहिंण किंवि, सद्दन्तरं सुणिज्जइ।
(छाया)-देवात्र किं कुर्म:। कथं पुनरत्यन्तसान्द्रनीरन्ध्र-नानाविध तरुगणसूननिवहनिरन्तनमधुरमधुरसमदचपल चपलानां उन्मत्तभ्रमराणां कलझङ्क.ारकोलाहलै: न किमपि शब्दान्तरं श्रूयते।

देव:-(पदान्तरे श्रुतिमभिनीय) (सहर्षम्)

किमिदं कलवचनं, हा.क्व नु जातं विजितकोकिलानिनदम्।
मदयति च मम स्वान्तं न श्रुतचरमपि न चानुभूतचरम्।।

विदू- (पार्श्र्वेवलोक्य, साट्टहासम्) हि हि देव इदो एव्व पेच्छ पेच्छ, इअं हि सा होदी दे पाणदइआ णोमालिआ वीहिसु कुसुमावचअं कुण्णदी भसलपीडणादो चकिदचकिदा हुविअहला परित्ताहत्ति बलिअं अक्कन्दई। दाणिं एव्व भमरावअणववदेसेण ताए सविहं गदुअ समीहिदं करिहे।

(छाया)-ही ही देव,इत एव पश्य पश्य । इयं हि सा भवती ते प्राणदयिता नवमालिकावीथिषु कुसुमापचयं कुर्वन्ती भ्रमरपीडनात् चकितचकिता भूत्वा "हला परित्रायस्व परित्रायस्वे"ति बलवदाक्रन्दते। इदानीं भ्रमरापनयव्यपदेशेन तस्याः सविधं गत्वा समीहितं कुरुष्व।

देवः-(सावहित्थं पदान्तरं गत्वानिर्वर्ण्य सानन्दं प्रत्यभिज्ञमिव) सखे, इयमेव सा मे जीविका, नूनम्, यत एषा सततचित्रपटदर्शनो ममानुभवपथमारोहति। पश्य

तदेवाङ्गं तन्व्याः कुशमिह तु लावण्यमधिकं,
तदेवेदं वक्त्रं स्फटिकरुचि गण्डेषु भवति।
तदेवाक्षिद्वन्द्वं बहुरहह तारे तु तरले
तदेतद्गाम्भीर्यं विलसति विलासैर्नवनवैः।।

किञ्च, आश्चर्यमन्यदिदमवलोकय।

विसरदधरभासा प्रान्तकुन्देषु कृत्वा
नवकिसलयलीलां सूनशोभां स्मितेन।
इयमिह निजदृष्ट्या तत्र भृङ्गीं विधाय
भ्रमयति मुखपद्मापातिनो मत्तभृङ्गान्।।

मलय- हला कलावदि परित्ताहहि इदो वरं ण पारेमि इमिणा कहुअरेण।

(छाया)- हला कलावति परित्रायस्व। इत: परं न पारयामि अनेन मधुकरेण।

देव:- (सविषादम्) सखे, कथमिह कलावती।

विदू- देव, मा भआहि, चिट्ठदुमुद्धदासी कहं मं अदिक्कामइ। चिट्ठइ किल मालिणी तत्थ सव्वकुसला पेच्छ।

(छाया)- देव, मा भैषीं: तिष्ठतु मुग्ध्दासी कथं मामतिक्रामति। तिष्ठति किल मालिनी तत्र सर्वकुशला। पश्य।

देव:-(निर्वर्ण्य) तर्हि जितमस्माभि:।

मालि- हला बाले मलअवदि किं मुहा अक्कन्दसि परित्ताहियत्ति। राआ खु लोआणं परित्तदा। किं करिस्सदि कलावदी मालिणीव। अहवा कल्लाणि तुह मुहपोह्ममहुरत्तणस्स फळं एव्व एदम्। किं करेह्म सहि।

(छाया)-सखि बाले मलयवति, किं मुधा आक्रन्दसे परित्रायस्वेति। राजा खलु लोकानां परित्राता। किं करिष्यति कलावती मालिनी वा। अथवा कल्याणि तव मुखपद्मधुरत्वस्य फलमेवैतत्। किं कुर्म: सखि।

देव:-(उपसृत्य भ्रमरापनयं नाटयति)

कला-(पदान्तरं गत्वा पुरोऽवलोक्य सोद्वेगम्) सहि मालिणि इदो एव्व आअदो कहं सामी।

(छाया)- सखि मालिनि, इत एव आगत: कथं स्वामि।

मालि-(सचकितमिव) अह्मो सहि किं करेह्म। जाणिज्जए खु देवीए हिअअम्।

(छाया)- अहो, सखि किं कुर्म:।ज्ञायते खलु देव्या हृदयम्।

कला- अयि कादरे करदव्वं किम्?

अणदिलंघणिज्जं खु देवस्स सायणम्।

(छाया)- अयि कातरे कर्तव्यं किम्। अनतिलङ्घनीयं खलु देवस्य शासनम्।

मल-(साकूतं निर्वर्ण्य आत्मगतम्) अह्महे को एसो।

सङ्गो कुसुमसारो किं

सिंगारो किणु मुत्तिसिंगारो।

आदिणणो किं चन्दो

चित्तपडे किमुअ सेविओ सामि।।

(छाया)- अहो क एष:-

साङ्ग.: कुसुमशर: किं

शृङ्गार: किन्नु मूर्तिशृङ्गार:।

अवतीर्ण: किं चन्द्र:

चित्रपटे किमुच सेवित: स्वामी।।

(प्रकाशम्) हला,

पसण्णमहुरोदारगंभीराणुवमाकिदी।

को एसो तळुणो चितं काए भग्गलआफलम्।।

(छाया)- हला

प्रसन्नमधुरोदारगम्भीरानुपमाकृति:।

क एष तरुणश्चित्रं कस्या भाग्यलताफलम्।।

मालि-(विहस्य) सहि,कलावदि,अअं तळुणीजणसुहावो जं सुंदरंमि पुरुसे सादरं णिजोओ।

(छाया)- सखि, कलावत्ययं तरुणीजनस्वभाव:

यत्सुन्दरे पुरुषे सादरंनियोग:।

कला- सहि किं एदं संगदिजोग्गं जणं मण्ण एव्व जाणादि।
(छाया)- सखि, किमेतत्, सङ्गतियोग्यं जनं मन एव जानाति।

मल- (निश्वस्य) अलं सहिओ असंगदालावेण।
(छाया)- अलं सख्यावसङ्ग.तालापेन।

कला- अइ मुद्धे, किं गोत्रणेण। पेच्छअअं एव्व दे भग्गलआफलं सामी दुवारआणाहो।
(छाया)- अयि मुग्धे, किं गोपनेन। पश्यायमेव ते भाग्यलताफलं स्वामी द्वारकानाथः।
मल- (निर्वर्ण्य आत्मगतम्) दिढं सो एव्व अअं सामी कहं अण्णहा एदस्सिं मे मणं रज्जइ।
(प्रकाशम्) होदु सहि, किं अण्णं परिहासेक्कभाअणं जादं मलअ वदीए जम्म।
(छाया)-द्दढं स एवयं स्वामि। कथमन्यथा एतस्मिन्मे मनो रज्जति । भवतु। सखि, किमन्यत्।परिहासैकभाजनं जातं मलयवत्या जन्म।

मालि- सहि कलावदि भूओदंसणेण खु णिण्णओ लोअस्स।
(छाया)- सखि कलावति"भूयोदर्शनेन खलु निर्णयो लोकस्य।"

कला- (विहस्य) सहि, निरहिजण्णाणं सुहावां एसो जं सहिअअजणवअणेसु विअविसासो।
(छाया)- सखि, विरहिजनानामयंस्वभाव एषः
यत् सहृदयजनवचनेष्वप्यविश्वासः।

मलय-(स्वगतम्) असंसअं अअं एव्व मे पाण्णाहो किं करेह्मि।
(छाया)- असंशयमयमेव मे प्राणनाथः। किं करोमि।

(प्रकाशम्)- (भयमभिनीय) अह्मो सहीओ किं एदेण विआरेण।
कुपिस्सदि देवी। सिध्धं गच्छह्म।
(छाया)- अहो सख्यौ, किमेतेन विचारेण।
कुपिष्यति देवी। शीघ्रं गच्छामः।
(इति पदान्तरं गच्छति)

देवः - (सहर्षम्) अये ओ अयमेव समुचितसमयः
सल्लपितुमस्माकम्।
(मलयवतीमुपसर्पति)
मलय- (सचकितम् कलावतीमाश्लिष्यति)
देवः-(सोत्प्रासम्) अयि मालिनि सेयं तव सहचरी
बलवद्भीतेव कुतः कलावतीमाश्लिष्यति।
मल-(स्वगतम्) दिढं मालिनीमुहादो मं जाणादि सामी।
(छाया)-दृढं मालिनीमुखान्मां जानति स्वामि।
मालि-(सस्मितम्) देव, सच्चं भीदेव्व मरिमलरसचवलेण
इमिणा महुअरेण।
(छाया)- देव, सत्यं भीतैव परिमलचपलेनानेन मधुकरेण!
विदू -हन्द अच्चरिअं अअं महुवोविकुट्टिणीउत्ते सअं
विवणमेत्तेण कसणोत्ति मलअवदीमुहं पीडेदि।
(छाया)-हन्ताश्चर्यम्! अयं मधुपोऽपि किट्टिनीपुत्रः स्वयं
अति वर्णमात्रेण कृष्ण इति मलयवतीमुखं पीडते।
कला-(सहसितम्)हला मालिणी कहं भणाइ बम्ह्वेदि। किं
सरसज्जो रसं उवट्ठिअं उझिअ गच्छइ।
(छाया)-सखि मालिनि कथं भणति ब्रह्मवेदी। किं स रसज्ञो
रसमुपस्थितं उत्सृज्य गच्छति।
देवः-(सहर्षम्)(आत्मगतम्)दिष्ट्या लब्धावकाशं चेतः।

(प्रकाशम्) अयि सत्यमेव ब्रवीषि। पश्य-

किसलयकरचरणोष्ठीं

भ्रमराक्षीं पीनगुच्छवक्षोजाम्।

नवमालिकास्वरूपां

त्यजति कथमिमां निवारितो मधुपः।।

(सस्मितं कलावती पश्यति)

कला-(अपवार्य) सहि मालिणि विण्णादं खु सामिणो हिअअम्।

(छाया)-सखि मालिनि विज्ञातं खलु स्वामिनो हृदयम्।

मालि-सहि किं करेह्मि।

(छाया)-सखि किं करोमि।

कला-(सधाष्टर्यम्) अयि चवले पुरुसोत्तमे बलक्कारिणि अबला किं करिस्सह्म। अहवा देवजोअंण दुद्धे गलिअं फलम्। किं अ काउण गई चन्दं विणा चन्दिआए। तं सहि गहि कहं वि अण्णदो गच्छह्म।

(छाया)-अयि चवले पुरुषोत्तमे बलात्कारिणि अबलाः किं करिष्यामः। अथवा देवयोगेन दुग्धे गलितं फलम्। किञ्च का पुनर्गतिश्चन्द्रं विना चन्द्रिकायाः। तत्साखि एहि कथमप्यन्यतो गच्छावः।

(परस्परं मुखमवलोकयतः)

विदूष- (मलयवतीमवलोक्य) भो देवि पेच्छ, सव्वअणपरित्ताणसीले दुवारआणाहे सअं उवट्ठिणो वि परित्ताहि परित्ताहित्ति मुहा मुद्धदासीअणं आलिङ्गे.सि कहम्?

(छाया)-भे देवि, पश्य, सर्वजनपरित्राणशीले द्वारकानाथे स्वयमुपस्थितेऽपि परित्रायस्वेति मुधा मुग्धदासीजनमा लिङ्गसि कथम्?

सख्यौ-(सबहुमपनम्) सच्चं एव्व फणादि पण्डिच्चसीमा अयं बम्मवेदि।

(छाया)-सत्यमेव फणति पाण्डित्यसीमा अयं ब्रह्मवेदी।

विदू-(कक्षं स्पृशन् स्मृतिमाभिनीय) हा. हन्द किं करेह्मि। कहिं गलीअं मे पञ्चङ्ग.पोत्थअम्। किं अवरम्। वीसपसिद्धं अत्तणो पण्डिच्चं पब्भट्टं एव्व कहं णु लग्गं भवे।

(छाया)-हा हन्त किं करोमि। कस्मिन् गलितं मे पञ्चाङ्गपुस्तकम्। किमपरं, विश्वप्रसिद्धमात्मनः पाण्डित्यं प्रभ्रष्टमेव। कथं नु लग्नं भवेत्।

(सव्याकुलं सहसोत्थाय यथागतमन्वेषणं नाटयति)

देवः-(सस्मितम्) समयोचितः प्रियवयस्यस्य विचारः।

कला- सहि मालिणि कुप्पदि देवी, सिद्धं गच्छह्म।

(छाया)-सखि मालिनि कुप्यति देवी। शीघ्रं गच्छावः।

अयि मलअवदि विसिज मम्। कुदो दे पुप्फभअणम्।

(छाया)-अयि मलयवति विसृज माम्। कुतस्ते पुष्पभाजनम्।

मल- सिह कहिं गलिअं ण जाणे।

(छाया)-सखि कस्मिन् गलितं न जाने।

मालि- हला कलावदि भमरपीडणादो णोमालिआवीहिसु विसिट्ठं भवे।

(छाया)-हला कलावति भ्रमरपीडनात् नवमालिकावीथिषु विसृष्टं भवेत्।

कला- सुद्ध चिन्दिदं सहि। तरिहि तद्ध अह्मेहिं एव्व अण्णेसणिज्जम्। सहि मलयवदि खणं एत्थ चिट्ट। तत्थ गमणे तुमं ण उज्झइ महुपजुवा।

(छाया)-सुष्ठु चिन्तितं सखि। तर्हि तत्रास्मभिरेवान्वेषणीयम्। सखि मलयवति, क्षणमत्र तिष्ठ। तत्र गमने त्वां न त्यजति मधुपयुवा।

(इति सख्यौ पदान्तरेऽन्वेषणं नाटयत:)

मल- (सकातर्यम्) कहं अहं उण एक्काइणी एद्ध चिट्ठामि। कहं भविस्सादि ण जाणे देवीअ।

(छाया)-कथमहं पुनरेकाकिनी तिष्ठामि। कथं भविष्यति न जाने देवी च।

(चलितुमिच्छति)

देव:- (सानुरागं वेणी गृह्णन् सानुनयममङ्के. निवेश्य)

बाले कोमललीले

त्वत्सल्लापरससादरस्वान्तम्।

अनवेक्ष्य मामयि त्वं

बत गच्छसि निर्दयं कथङ्कारम्।।

(सपुलकं चुबुकमुन्नमयति)

मल-(सगद्गदम् सचकितं च) देव किं करेह्यि। अप्पणो ण पहवामि अज्ज उण देवी कुप्पइत्ति वेवइ मे हिअअम्। ण जाणिज्जइ देवीए संकप्पो वि।

(छाया)-देव, किं करोम्यात्मन: न प्रभवामि। अद्य पुन: देवी कुप्यतीति वेपते मे हृदयम्। न ज्ञायते देव्या: सङ्कल्पोऽपि।

(सलज्जमधोमुखी तिष्ठति)

(नेपथ्ये)

भो भो बालिशा: पुष्पोद्यानं गता: कथं विलम्बन्ते। पूजासमयोऽतिक्रामतीति पन्श्चानमन्वीक्षते बहुतरं देवी।

मल- अह्महे अअं हि वरिसवरो देवीए।
(छाया)-अह्मे अयं हि वर्षवरो देव्याः।

(सभयमङ्कादुत्तिष्ठति)

सख्यौ-(सचकितं प्रतिनिवर्त्य) अय्यं, सिध्धं एव्व अह्माणं अण्णदो गन्दुं अणुजणिहि।

(छाया)-आर्य, शीघ्रमेवास्माकं अन्यतो गन्तुमनुजानीहि।

(मलयवतीमवलम्ब्य गमनं नाटयतः)

देवः-(सनिर्वेदम्) एहि सखे, किं मृगयसे। सङ्गरसमयेऽजनि ज्याभङ्गः।

चेतोमृगं सचकितं मम पक्ष्मलाली
सा दृष्टिरश्मिनिवहैरदयं निबध्य।
आकृष्य गच्छति मुहुर्मुहुरद्य सारं
मूढानि हन्त करणानि च किं करोमि।।

विदू- (स्वगतम्) हन्द वरिस्वरो खु पच्छूहोजादो।
(छाया)-हन्त वर्षवरः खलु प्रत्यूहो जातः।

(प्रकाशम्) देव तरिहि तुमं वि झडिदिं केसे घक्कूण आ करिसेहि।

(छाया)- देव तर्हि त्वमपि झटिति केशे गृहीत्वा कर्षय।

देवः- (निश्वस्य)

कदाहं कल्याणिमभयमनुभोक्ष्ये चिरतरं
कदा वा पूजा स्यात् कथमथ च देव्याश्च करुणा।
इदानीं तन्वङ्ग्या यदपि कथितं प्रेमपिशुनं
तदुत्प्रेक्ष्योत्प्रेक्ष्य त्रुटति बहुधा हन्त हृदयम्।।

(प्रतीचीमवलोक्य)

पश्य, सखे कथमयं विघटिततमोबन्ध: कमलबन्धु: सन्ध्यापुरन्ध्रिकन्थरान्तरविलम्बिजाम्बूनदमयवर्तुलविचित्रतरनायकमणिबन्धाडम्बरविडम्बनचञ्चुरम्बरमणि: चरमगिरिनिकटतटमवतरति भगवान् सहस्रभानु:। अयं किल

शाखासु पल्लवरुचिं जनयन्कराग्रै:
आशाङ्गनासु रचयन् हरिचन्दनाभाम्।
जात: स्वयं च रजनी मुखकुङ्कुमाङ्क.:
पीताम्बरेण च परिष्कुरुते प्रतीचीम्।।

किञ्च-

उद्यानमद्य भजते तमसैकभावं
सा च प्रिया नयनयो: सरणिं व्यतीता।
का मे धृति: क्व च गति:शरणं किमन्यत्
ध्यायामि किन्नु कथयामि करोमि किन्नु।।

विदू- देव, सुज्जे पलाइए वि किं एद्ध कुहा धाएसि। अहवा किं उज्जाणभूदाणं बम्मणं बलिं कादुं पअद्दोसि

(छाया)- देव सूर्ये पलायितेऽपि किं मुधा ध्यायसे। अथवा किमुद्यानभूतानां ब्राह्मणं बलिं कर्तुं प्रवृत्तेऽसि।

देव:- सखे, प्रधानसौधपर्यन्तमेत्यान्त:पुरवृत्तान्तेन समयं नयामि।
(इति निष्क्रान्ता: सर्वे)

इति श्रीमुष्णनगरनिवासिकौण्डिन्यकुलतिलकायमान-
श्रीमद्वीरवल्लिवरदनारायणगुरुवरतनय श्रीनिवास-
विबुधमहागुरुकृतिषु
वकुलमालिनीपरिणये
।। द्वितीयोऽङ्क.:।।

।।श्री:।।

अथ तृतीयोऽङ्क: प्रारभ्यते

(तत: प्रविशति चेटी)

चेटी-(सहर्षम्) अह्महे णिन्दणिज्जं वि कम्म विसअविसेसादो अच्चन्दं अदिसअं आवहइ। जदो -

दूरे सुहं बहुमदी णअणप्पवाहो
उत्तीदु राअउलसव्वणिदेसजोग्गा।
इत्थं णिरत्थमिह जन्म दु चेडिआणं
खेमं करेइ मह माहवजोआ लोहात्।।

अह कहिं उण सामिणं पिक्खिअ मालिणीए उस्रदिट्ठं रहस्सं भणिज्जम्।

(छाया)- अहो निन्दनीयमपि कर्म विषयविशेषादत्यन्तमतिशयमावहति। यत:-

दूरे सुखं बहुमति: न च न प्रभावो
वृत्तिस्तु राजकुलसर्वनिदेशयोग्या।
इत्थं निरर्थमिह जन्म तु चेटिकानां
क्षेमं करोति मम माधवयोगलोभात्।।

अथ कस्मिन् पुन: स्वामिनं प्रेक्ष्य मालिन्या उपदिष्टं रहस्यं फणिष्ये।

(पदान्तरं गत्वा पुरोऽवलोक्य)

अह्महे बह्मवेदीमेत्तसहअरो सामी किं वि मन्तअन्तो कमलाविळासपज्जत्ते चिट्ठदि। समयं पेच्छह्मि दाव।

(छाया)-अहो ब्रह्मवेदिमात्रसहचर: स्वामी किमपि मन्त्रयन् कमलाविलासंपर्यन्ते तिष्ठति। समयं पश्यामि तावत्।

(ततः प्रविशति कामयमानावस्थो देवो विदूषकश्च)

देवः-(सानुरागं विभाव्य)

तस्याः सस्मितसादरेक्षणकलादास्येऽप्ययोग्यःशशी
तत्सल्लापरसार्द्रयोः श्रवणयोर्वीणापि वज्रायते।
तस्या गात्रसुखस्मृतौ सुमनसां शब्दोऽपि भारायते
तद्वस्त्रामृतवर्णने नवसुधासारः परं नीरसम्।।

(निश्वस्य) शृणु सखे-

कमनीयमन्दगमना
कलवचना कान्तपत्ररेखा सा।
प्रविवेश मानसं मे
घनभयतरलाद्य राजहंसीव।।

विदू-(स्वगतम्) अअं खु पलावस्स आरंभो।

(छाया)-अयं खलु प्रलापस्यारम्भः।

(प्रकाशम्) देव जाणे मयि पोत्थअं अण्णेसिदुं गए सा तुह हिअअं पविट्ठेव्व।

(छाया)-देव जाने मयिपुस्तकमन्वेष्टुं गते सा तव हृदयं प्रविष्टेव।

देवः-(सविषादम्) शृणु सखे, तदपि वनगोचरैव चन्द्रिका जाता।

वराङ्ग्या वक्षोजौ दृढमुरसि विन्यस्य विपुलौ
यथेच्छं संश्लिष्यन् मुहुरहमुदञ्चन्नपि मुखम्।
तदानीं भूयस्तद्विरहभयमाशङ्क्य विवशं
सुखं वा दुःखं वा किमपि नहि वेत्ति स्म हृदयम्।।

विदू- देव सच्चं तदो खु उद्धदासीउत्तो वरिसवरो तत्थहोदीमुहसुहाए
अवग्गदो जादो।

(छाया)-देव सत्यम्। ततः खलु वुद्धदासीपुत्रो वर्षवरः
तत्रभवतीमुखसुधाया अवग्रहो जातः।

देवः वयस्य तत् किन्नु फणामि।

वक्त्रं तत्क्षणतान्तमङ्ग.मवशं वल्गात्कुचा गद्गदाः
पक्ष्मप्रान्तविवर्तिबाष्पसलिक्तं पर्याकुले
भाषितम्।
निश्वासः पुनरायतस्तत इतो निर्व्याजमुद्वीक्षणं
तस्यास्सम्प्रति तत्तदेकमधिकं चेतो नमे
मुञ्चति।।

अये किमन्यत्।

तत्सन्निधानसमये वत्सरोऽपि क्षणायते।
तस्यास्त्वसन्निधौ भूयःक्षणः संवत्सरायते।।

(प्राचीमवलोक्य) इदमप्यावेदने हृदयस्य।

कुर्वन् दिशः स्मितमुखीः स्वकराग्रसङ्गा-
दामोदिनीः कुमुदिनीः कलयन्कलात्मा।
गाढं निशानिबिडदुःखतमोऽपनेष्यन्
ऐन्द्रीमुखं सपदि चुम्बति सान्द्ररागः।।

विदू- देव, एदं खु अच्छिरोआदुरस्स महादीवसंदंसणम्।
(छाया)-देव, एतत् खल्वक्षिरोगातुरस्य महादीपसन्दर्शनम्।

देवः- सखे, अभिज्ञः खलु भवान्।

दिशि दिशि बत सान्द्रा जृम्भते चन्द्रिकेयं
नदति मदनमौर्वी स्पन्दते मन्दवातः।

न गणयति च देवी नैव सा योगिनीव
प्रभवति कथमेषा बालिका किं करोमि।।

विदू-(पुरोऽवलोक्य) देव, पेच्छ पट्ठो भविस्सदि अन्तेउरउत्तन्तो।

(छाया)-देव, पश्य स्पष्टो भविष्यति अन्तःपुरवृत्तान्तः।

देवः- (निर्वर्ण्य) इयं हि चेटी वसुमती नाम।

(उपसृत्य)

चेटी- जेदु देवो, जेदु देवो।

(छाया)-जयतु देवः, जयतु देवः।

देवः- (सहर्षम्) हज्जे, को नाम समयो देव्याः।

वसुम- देव दाणिं एव्व-

लच्छीपूजा अ संपुण्णा देवी कच्चाइणी जुआ।
णाडआलोअणेणज्ज णत्तं सभं गदा।।

(छाया)-देव इदानीमेव-

लक्ष्मीपूजा च सम्पूर्णा देवी कात्यायनीयुता।
नाटकालोकनेनाद्य नक्तं नेतुं सभां गता।।

विदू- (आत्मगतम्) अह्मो अमन्ते पासाणपाओ।

(छाया)-अहो अमत्र पाषाणपातः।

(प्रकाशम्) अयि किं मोदअदाणं वि जादम्

(छाया)- अयि किं मोदकदानमपि जातम्।

वसु- अय्य तुमं उद्दिसिअ कलावदीए पडिग्गहीदम्।

(छाया)-आर्य, त्वामुद्दिश्य कलावत्या प्रतिगृहीतम्।

विदू- अह्मो, इअं कुदो जादा बह्मखादिणी।

(छाया)-अहो इयं कुतो जाता ब्रह्मखादिनी।

देवः-अयि, तिष्ठत्वेतत्। किं नाम तन्नाटकम्।
वसुम -देव, अपुव्वं रुप्पिणीपरिणयामित्ति किदं जोइणीए।
(छाया)- देव, अ पूर्वं रुक्मिणीपरिणयमिति कुतं योगिन्या।

विदू- देव, इदं विदे पहाणदेवीपसादं उद्धिसिअ इत्ति जाणीहि।
(छाया)-देव, इदमपि ते प्रधानदेवीप्रसादमुद्दिश्य इति जानीहि।

देव- अये, अन्यादृशं देव्यां भगवतीप्रेम।
विदू- देव, किं अच्चरिअं, सा हि भअवदी तादभइणी देवीए।
(छाया)-देव,किमाश्चर्यम्। सा हि भगवती तातभगिनी देव्याः।

देवः- अयि, किमुचितानि पात्राणि निर्णीतवती तत्रभवती।
वसु- अय्य सुणाहि।

ठाविदा जोइणीसिस्सा तुह्मंथाणे दु माळिणी।
कळावदी ठिआ चेडी बह्मवेदिपदे सअम्।।

(छाया)-आर्य शृणु।

स्थापिता योगिनीशिष्या युष्मत्स्थाने तु मालिनी।
कलावती स्थिता चेटी ब्रह्मवेदिपदे स्वयम्।।

विदू- (निश्वस्य) हन्द, किं बहुणा। राअउलं पविट्ठो कळावदीवेसेण बह्मदिकालदोसो।
(छाया)-हन्त, किं बहुना। राजकुलं प्रविष्टः कलावतीवेषेण ब्रह्मवेदिकालदोषः।
देवः-अयि,युज्यत एवैतत्। का नाम प्रियतमाभूमिकायाम्।
वसु- देव, का उण अण्णा। मलअवदी एव्व।
(छाया)-देव, का पुनरन्या । मलयवत्येव।

देव:- (सशिर:कम्पम्) अयि कनकलतैवार्हति तटिल्लता-
साम्यम्। अयि किमारब्धमद्य सङ्गीतकम्?

वसु- देव दाणिं कावि पुलिन्दी देवीं विणोदइदुकामा सभं गआ। एद्धन्तरे माळिणी "हज्जे, कहेहि सामिणं, कहं वि अन्तेउररङ्गसालाजवणिअन्तरं एक्को एव्व सिध्धं पविसदु सामित्ति" कण्णे कहिदवदी आसी। अहं दु सुत्रआरत्तणे ठिआ गच्छह्मि।

(छाया)-देव इदानीं कापि पुलिन्दी देवीं विनोदयितुकामा सभां गता। अत्रान्तरे मालिनी "हञ्जे, कथय स्वामिनं कथमप्यन्त:पुररङ्ग.शालायवनिकान्तरमेक एव शीघ्रं प्रविशतु स्वामी " ति कर्णे कथितवत्यासीत्। अहं तु सूत्रधारत्वे स्थिता। गच्छामि।

(इति निष्क्रान्ता चेटी)

देव:-(सविमर्शहर्षम्) सखे, मयि च कमप्यतिशयं कर्तुकामया कात्यायिन्यैव कल्पितोऽयं मन्त्र इति मन्ये।

विदू- देव, को णु सन्देहो।

(छाया)-देव, को नु सन्देह:।

(विहस्य) किं अण्णम्। चोरस्स सुरङ्गालाहो वि।

(छाया)-किमन्यत्। चोरस्य सुरङ्गालाभोऽपि।

देव:-सखे तदस्तु। कथमन्तर्गन्तुमभ्युपाय:।

विदू-देव, अत्थि खु सुरङ्गामग्गो। देण पविसेहि तुमम्। अहं दु उवरितळमारुहिय कंबलावकुंठिअसव्वंगो णट्टं पेच्छह्मि।

(छाया)-देव, अस्ति खलु सुरङ्गामार्ग:। तेन प्रविश त्वम्। अहं तूपरितलमारुह्य कम्बलावकुण्ठितसर्वाङ्गो नाट्यं पश्यामि।

देवः-(सानन्दम्) सखे, समयोचितमेव मन्त्रितं भवता।

विदू- (उपरितलारोहणं नाटयन् अन्तरवलोक्य) अह्मो रण्णसण्णाहो। देव सिध्धं पवेसेहि। अहं एद्ध उवसिय पेक्खिस्सं दाव।

(छाया)-अहो रङ्गसन्नाहः। देव शीघ्रं प्रविश। अहमत्रोपविश्य प्रेक्षिष्ये तावत्।

(उपविश्य तथा कम्बलेनाच्छाद्य सहर्षम्)

अह्मो अदीव सुहअरं एदं उवरितलम्।

(छाया)-अहो अतीव सुखकरमिदमुपरितलम्।

(इति वदन्नेव निद्रां नाटयति)

देवः- (सुरङ्गाप्रवेशं नाटयन् पुरोऽवलोक्य) अये इत एव कलावती मालिन्यपि वयस्यस्य मम च नैपथ्यरचनां विरचयन्त्यौ यवनिकांन्तरे वर्तेते।

(उपसर्पति)

कला- अयि सहि, इदो इदो सामी।

(छाया)-अयि सखि इतःइतः स्वामी।

मालि-(सपदि समुत्थाय) सहि समअवेदी खु सामी देव , इदो खणं उविसदू सामी।

(छाया)-साखि, समयवेदी खलु स्वामी। देव इतः क्षणमुपविशतु स्वामी।

देवः- अयि यदिह रोचते। (उवपिशति)

मालि-देव, आणत्तह्मि भअवदीए। जह

(छाया)-देव आज्ञप्तास्मि भगवत्या। यथा-

"वत्से मालिनि, सम्प्रति स्वामिनः स्थानेस्वामिनमेवाधाय त्वमन्यत्र लीनाभवे"ति।

देव:-(स्वगतम्) अहो फलितो मे तर्क:। अत्र च मम प्रियतमासमागमो भवत्वित्याशयो भगवत्या:। (प्रकाशम्) अयि मालिनि, यदादिशति भगवती तदेव सर्वनिदानमस्माकम्।

मालि- अयि कळावदि सावहाणं अणुसरेहि सामिणम्।

(छाया)-अयि कलावति सावधानमनुसर स्वामिनम्।

(सुरङ्गां प्रविशति)

देव:- कलावति, क:पुनरद्य समयो देव्या:।

कला-देव इदो पेक्खदु भवं जवणिआजालएण पुळिन्दीविणोदं पेच्छन्ती चिट्ठदि देवी।

(छाया)-देव, इत: प्रेक्ष्यतां भवान् यसनिकाजालकेन। पुलिन्दीविनोदं पश्यन्ती लिष्ठति देवी।

देव:-(यवनिकाजालकेन निर्वर्ण्य सहर्षम्) इतो भद्रासने देवी योगिन्या सह तिष्ठति।

एते परिजना:सेयं पुलिन्दी भाषते पुन:।

अयि कलावति, तद्यावदवसरमिदं पश्याम:।

(पश्यन् स्थित:)

(तत: प्रविशति उपविष्टा सत्यभामा योगिनी यथार्ह परिजनो जानूपविष्टा पुलिन्दी च)

चामरग्राहिणी- देवि, अवि णाम णिउणा भविस्सदि इअं पुलिन्दी।

(छाया)-देवि, अपि नाम निपुणा भविष्यति इयं पुलिन्दी।

सत्य- पेच्छह्म।

(छाया)-पश्याम:

कात्या-देवि, कषणे खलु कनकपरीक्षा।
सत्य- अयि पुलिन्दि के उण देसा तुए दिट्ठा।
(छाया)-अयि पुलिन्दि के पुनर्देशास्त्वया दृष्टा:।

पुलि- सुणाहि, हे अम्ब-

चोल कुरु हूण सअ चेर मअहेसु
चेइ मद कुन्दि हअ चण्डवालेसु।
मालव णिसह मच्छ मलआळदेसेसु
माणिणि बाळाहमपि सच्चारसीका।

(छाया)-शृणुष्व, हे अम्ब-

चोल कुरु हूण शक चेर मगधेषु
चेदि मद्र कुन्दि हय चण्डवालेषु।
मालव निषध मत्स्य मलयालदेशेषु
मानिनि गालाहमपि सच्चारशीला।।

सत्य-इयं तहिहि कुसलेव्व।
(छाया)-इयं तर्हि कुशलैव।

कात्या- दैवबलमस्या: पश्याम:। अयि पुलिन्दबालिके, किदृशं पुनर्दैवतमुपासितं भवत्या।

पुलि-(सोत्प्रासम्)-

अह्मकुलदेव्वमइ सङ्कप्पसिद्धं
सिवपुव्वगुरुंमाणुविद्धम्।

(सपुलकम्)

आणन्दभवणक्खमवि जस्य धाम
साणन्दामिह जस्स धरणी उ रामा।।

(छाया)- *अस्मत्कुलदैवमयि सङ्क.ल्पसिद्धं*
ब्रह्मशिवपूर्वगुरुपद्मानुविद्धम्।
आनन्दभवनाख्यमपि यस्य धाम
सानन्दमिह यस्यधरणी नु रामा।।

कात्या- पश्य देवि-

इयमतिकुशला नूनं श्रीमुष्णेशोऽधिदैवतं यस्याः।
यस्यानुग्रहकलया जडमपि भजने हि तत्त्वविज्ञानम्।।

सत्य-(विचिन्त्य)(सानन्दम्) जाणे भअवदि जाणे।

(छाया)-जाने भगवति, जाने।

चामर- भअवदि, तरिहि देवीए लक्खणाइ पेक्खदु पुलिन्दी।

(छाया)-भगवति, तर्हि देव्या लक्षणानि प्रेक्ष्यतां पुलिन्दी।

कात्या-(विहस्य) अयि मुग्धे,तदिदं "किरीटविभूषिते शिरसि पुनरावर्तपरीक्षणम्"।

देवः-(जनान्तिकम्) अयि कलावति, सत्यमाह कात्यायनी।

कला-देव, अहव तारावलीए धवलिमपरिक्खणं सोदामिणीए सोन्दरज्जसोहणं चन्दकलाए महुरिमचिन्दणं एदम्।

(छाया)-देव, अथवा तारावल्याः धवलिमपरीक्षणम्, सौदामिन्याः सौन्दर्यशोधनं चन्द्रकलाया मधुरिमाचिन्तनमेतत्।

सत्य-अयि पुलिन्दि, मह मणंमि चिन्दिदं किं वि भणाहि।

(छाया)-अयि, पुलिन्दि, मम मनसि चिन्तितं किमपि भण।

कात्या- तदिह परं विचारणीयम्।

पुलिन्दी-(वराटिकागणनं नाटयन्ती) सुणाहि हे अम्ब,जाणे अज्ज पुरुसस्स दइजाभिजोअं चित्ते करेसि। सुइरं किल साणुराअम्।

(छाया)-शृणुष्व हे अम्ब जाने अद्य पुरुषस्य दयिताभियोगं
चित्ते करोषि सुचिरं किल सानुरागम्।

कात्या-(देवीं पश्यति)

चाम- भअवदि, उत्तं हि देवतामाहप्पम्।

(छाया)-भगवति, उक्तं हि देवतामाहात्म्यम्।

सत्य-(सादरम्) अइ पुलिन्दि, सच्चेण भणा हि कदा घटइत्ति।

(छाया)-अयि पुलिन्दि, सत्येन भण कदा घटत इति।

पुलिन्दी- (ध्यानं नाटयन्ती)(सप्रत्यम्) खणमेत्तमिह पेच्छ दइअं
हि तं एव्व दइएण जोअअदि देणेव्व देव्वम्।

(छाया)-क्षणमात्रमिह पश्य, दयितां हि तामेव दयितेन योजयति
तेनैव दैवम्।

सत्य-(विहस्य) भअवदि किं एदं रुच्चइ दे हि अआअ।

(छाया)-भगवति, किमेतद्रोचते ते हृदयाय।

कात्या- देवि, अघटितघटनाचातुरीधुरीणं दैवमेव प्रमाणम्।

देवः-(जनान्तिकम्) आश्चर्यमतिचतुरं जगाद भगवती।

कला-(सशिरःकम्पम्) देव, चिट्ठदु एदं अण्णारिसं पुलिन्दीए
विण्णाणचाउरीअम्। जं सच्चं एव्व भणादि, खणमेत्तेण
दइआसमाअमो भविस्सदित्ति।

(छाया)-देव, तिष्ठत्वेतत्। अन्यादृशं पुलिन्द्या विज्ञानचातुर्यं
यत्सत्यमेव भणति"क्षणमात्रेण दयितासमागमो भविष्यती"ति।

सत्य- होदु पुलिन्दि, इदं दे कण्ठाभळणम्।

(छाया)-भवतु पुलिन्दि, इदं ते कण्ठाभरणम्।

(मुक्तावलीं पारितोषिकं दत्वा)

भो भअवदि, चिट्ठदु एदं, किं अज्ज वि णेवज्जं णावसिदम्।
(छाया)-भो भगवती, तिष्ठत्वेतत्। किमद्यापि नैपथ्यं नावसितम्।

कात्या- पश्य देवि, प्रविष्टैव वसुमती सूत्रधारवेषेण।

(ततः प्रविश्य)

सूत्रधारः- (हस्तमुद्यम्य)

मुग्धस्मेरमुखारविन्दमधुरं मुग्धाङ्गनामाहनं
स्निग्धस्निग्धनवाञ्जनौघ सुषुमं सिद्धं श्रुतीनां शतैः।
चिद्रूपं जिततामसप्रकृतिकं चिन्त्यं चिरं चिन्तकैः
भद्रं नः प्रथयत्वमन्दममिजं पद्मासहायं महः।।

चाम- भअवदि एदे णन्दीगुणा अह्मसामिणं अवलंबन्तिव्व।
(छाया)-भगवति, एते नान्दीगुणा अस्मत्स्वामिनमवलम्बन्तइव।

कात्या- अयि कः सन्देहः?

सूत्र- (परिक्रम्य) अद्य खल्वादिष्टवती लोकैकनाथचित्ताभिरामा सत्यभामा। यथा-

अस्मिन्पूजोत्सवे लक्ष्म्या रुक्मिणीमङ्गलाह्वम्।
भगवत्या कृते वस्तु भरताभिनयेति माम्।।

सुघटिते च सर्वमपि। यतः-

काव्ये निपुणा माता
देव्येव सभाधिदेवता जाता।
शस्तं नश्चातुर्यं
निस्तुलमपिवस्तु कौस्तुभधरस्य।।

चाम- अच्चनिअं अच्चरिअं। भअवदीए पत्थावणचाउरीअम्।
(छाया)-आश्चर्यमाश्चर्यं भगवत्याः प्रस्तावनाचातुर्यम्।

सत्य-(विहस्य) अइ मुग्धे, एतद्धि सूचनामात्रं पाण्डित्यस्य।

कात्या-देवि, कृतं स्तोत्रेण। अथवा-

प्रतिपाद्यगुणैरनघैः

लघुपदमपि याति गौरवं नितराम्।

नवमालिकया नद्धं

तृणमपि भजते हि देवमूर्धनिम्।।

सूत्र- पश्यतु देवी-

विलसति रङ्गं गमिता

कुलविद्या मम च लालसा कृष्णे।

ललिततरं धृत्वेयं

मलयवती वाद्य रुक्मिणीरूपम्।।

कात्या- जनान्तिकम् देव, पेच्छ पेच्छ, इदो पविट्ठा दे पाणवल्लहा घणजवणिआमज्झादो सोदामिणिंव्व।

(छाया)-देव, पश्य पश्य, इतः प्रविष्टा ते प्राणवल्लभा घनयवनिकामध्यात् सौदामिनीव।

देवः-(सहर्ष र्विण्य) अयि, किमाश्चर्यं, सौवर्णकुसुमस्य जातमिह सौरभ्यं यदियमेव देवीतादात्म्यमधिवहति।

(ततः प्रविशति नायिका सह सखीभ्याम्)

नायिका-(स्वगतम्) अवि णाम पेक्खिस्सं एद्ध पिअदभूमिआमेत्तमवि। (प्रकाशम्)

अह्मे सहीओ किं करेह्म, कहिं गच्छह्म।

(छाया)-अपि नाम प्रेक्षिष्येऽत्र प्रियतमभूमिकामात्रमपि। (प्रकाशम्)

अहो सख्यौ किं कुर्मः, कस्मिन् गच्छामः।

पद्मिनी- सहि रुप्पिणि एव्वं णिरन्तराए चिन्ताए बलिअं परिसंतासि। कहिं वि खणं उबविसह्म।

(छाया)- सखि रुक्मिणि, एवं निरन्तरया चिन्तया बलवत् परिश्रान्तासि। कस्मिन्नपि क्षणमुपविशामः।

कुमुदिनी- सहि इदं एव्व जुत्तं विजणं चन्दमाणिमण्डवम्।
(छाया)-सखीदमेव युक्तं विजनं चन्द्रमणिमण्डपम्।

नायि- जह सहीणं मणम् ।
(छाया)-यथा सख्योर्मनः।

(सह सखीभ्यामुपविशति)

सत्य- (निर्वर्ण्य) (सनिश्वासं साश्चर्यम्)
अह्मो भअवदी अह्मदेवी मलअवदीणं कं विभेदं ण पेच्छह्मि।
(छाया)-अहो भगवति अस्मद्देवीमलयवत्योः कमपि भेदं न पश्यामि।

चाम-देवि तं खु महिमा भअवदीए।
(छाया)-देवि तत्खलु महिमा भगवत्याः।

नायि- (विचिन्त्य) सनिश्वासम्) सहिओ जोव्वणभग्गं पिअजणघडणेण सुहं सदा कुणइ।
विमदसमागमखेदावरमजणी हि भुवणेसु वणिदमणम्।
(छाया)-सख्यौ-

यौवनभाग्यं प्रियजनघटने सुखं सदा कुरुते।
विमतसमागमखेदाद्वरमजनि हि भुवनेषु वनितानाम्।।

पद्मि- (स्वगतम्) हन्द को णु जादो चेदिराअहदओ जदो अुव्विणीदादो इअं एव्वं पलवन्दी चिट्ठदि। किं करेह्मि।
(छाया)-हन्त क नु जातः चेदिराजहतकः यतो दुर्विनीतादियमेवं प्रलपन्ती तिष्ठति। किं करोमि।

(प्रकाशम्) हळा सहि समाणप्पेम्माणं एव्व सच्चं रुव्वइ मणम्।
"तं एव्व रुव्वं ळायण्णं तं एव्व णवजुव्वणम्।
सो एव्व भोगो सुहदो जइ प्रम्म समं भवे।।"
(छाया)-हला सखि, समानप्रेम्णामेव सत्यं रोचते मनः।
तदेव रूपं लावण्यं तदेव तवयौवनम्।
स एव भोगः सुखदो यदि प्रेम समं भवेत्।।

कुमु- सहि, अवि णाम परिहरणिज्जो भविस्सदि चेदिराओ ।
देव्वं कहं चिन्देदि ण याणे।
(छाया)-सखि, अपि नाम परिहरणीयो भविष्यति चेदिराजः।
दैवं कथं चिन्तयति न जाने।

सत्य- हन्द भअवदि, एआरिसो किं विसादो चेइराए देवीए।
(छाया)-हन्त भगवती एतादृशः किं विषादः चेदिराजे देव्याः।

का- देवि, किमेतत्। शिशुपालसंज्ञाश्रवणमात्रमपि वज्रप्रहरमिव
न सहते देवी।

चाम- देवि, जुत्तं एव्व तं अह्मसामिणिहिदजीविदाए देवीए।
अहव कहं सुहारसपाणसी आरणाहं अहिवंछदि।
(छाया)- देवी युक्तमेव तत् अस्मत्स्वामिनिहितजीविताया देव्याः।
अथवा कथं "सुधारसपानशीलः आरनालमभिवाञ्छति"।
नायि- अह्मो सहीओ, किं करोह्मि अप्पणो ण प्पहवामि।
मादा मे जणएण सा परवदी सोवि स्सयं मन्दही
मुद्धा बंन्धुजणा विवक्खसुहुदो वावादिणो मन्तिणो।
चेदो संपडि,वट्टइ पिअजणे लोउत्तरे हा कहं
णूणं वध्धमुहे मिई लहु बली कादं पउट्टो विही।।
(छाया)-अहो सख्यौ, किं करोम्यात्मनो न प्रभवामि।

माता मे जनकेन सा परवती सोऽपि स्वयं मन्दधीः
मुग्धा बन्धुजन विपक्षसुहृदो व्यापादिनो मन्त्रिणः।
चेतः सम्प्रति वर्तते प्रियजने लोकोत्तरे हा कथं
नूनं व्याघ्रमुखे मुगीं लघुबलीं कर्तुं प्रवृत्तो विधिः।।

(विचिन्त्य) (सनिश्वासं विहस्य) होदु सहि, समए समीहिदं पेच्छह्मि।

(छाया)-भवतु सखि, समये समीहितं पश्यामि।

सत्य- (सशिरःकम्पम्) भअवदि, धण्णो एव्व अह्म सामी जं एव्व एआरिसदेवीए पेम्मभाअणं जादो।

(छाया)-भगवति, धन्य एवास्मत्स्वामी यदेवमेतादृशदेव्याः प्रेमभाजनं जातः।

का- देवि, किमाश्चर्यं धन्यतम इत्येव वक्तव्यम्।

पश्य-

तयैव खल्वयं श्रीमान् तया हि जगतां पतिः।
तया सुखी किं बहुना तयैवास्य तु जीवितम्।।

चाम- भअवदि किं अण्णम्। लच्छीव्व नारायणस्स।

(छाया)-भगवति, किमन्यत्, लक्ष्मीरिव नारायणस्य।

सत्य-(सलज्जम्) अह्महे भअवदि महाणुहावप्पकिदी अह्मरुप्पिणीदेवी।

(छाया)-आश्चर्यं भगवति महानुभावप्रकृतिरस्मद्रुक्मिणीदेवी।

कात्या- अथ किम्?

सत्य- (सानुशयम्) भअवदि ओदारविसेसो जयज्जणणी एत्ति मण्णे।

(छाया)-भगवति, अवतारविशेषो जगज्जनन्या इति मन्ये।

का-(स्वगतम्) हन्त दिष्ट्या निर्विघ्नसङ्कल्पास्मि यत:इयं रुक्मिणीभक्तया कुशलवती जाता।

(प्रकाशम्)देवि, क: पुन: सन्देह:।

पद्म- (सचकितम्) (आत्मगतम्) कहं एसा साहसं करिस्सदिव्वप्पडिभाइ।

(प्रकाशम्) अह्मो सहि रुपिणि तुमं एव्व कि वि परुसं भणासि। पच्चासण्णो विमदपरिणअसमओ वि। आ किं करेह्मि। {इत्याश्लिष्यति}

(छाया)-कथमेषा साहसं करिष्यति इव प्रतिभाति।

(प्रकाशम्) अहो सखि रुक्मिणि, त्वमेवं किमपिपरुषं फणसि। प्रत्यासन्नो विमतपरिणयसमयोऽपि। आ.किं करोमि (इत्याश्लिष्यति)

कुमु- (विचिन्त्य) अइ मुद्धे पोम्मणि किदं काअरदाए किंण जाणेसि। दाणिं एव्व खु दुवारआणाहं पइ णिउणं लेहंअ पेसिदो हि बह्मणो। उत्तं हि देण खणमेत्तेण अह्मसङ्केदठाणं आणइस्संमि सामिणं ति।

(छाया)-अयि मुग्धे पद्मिनि कृतं कातरतया।

किं न जानासीदानीमेव खलु द्वारकानाथं प्रति निपुणं लेखं दत्वा प्रषितो हि ब्राह्मण:। उक्तं हि तेन "क्षणमात्रेण अस्मत् सङ्के.तस्थानमानयिष्यामि स्वामिनमि"ति।

पद्मा-(स्मृतिमभिनीय) (उरसि करं निधाय) अह्म हे सहि अधो किदं सव्वं वि अह्मसहीणिव्वेदेण।

(छाया)- आश्चर्य सखि अध:कृतं सर्वमपि अस्मत्सखीनिर्वेदेन।

नायि- सहिओ, किं तह अणुऊळठस्सदि देव्वम्।

(छाया)-सख्यौ,किं तथा अनुकूलयिष्यति दैवम्।

सख्यौ- सहि मा भआहि. अणुऊळं एव्व देव्वम्। जं अच्चदचउरो अह्माणंवह्मणो जादो उट्ठेहि सहि, दाणिं देवीपूजणत्थं आदिट्ठवन्तो खु तत्तभवं राआ। तदो तस्त ववदेसेण पमदवणं एव्व सिग्घं पविसह्म।

(छाया)-सखि, मा भैषी: अनुकूलमेव दैवम्। यदत्यन्तचतुर: अस्मद्ब्राह्मणो जात:। उत्तिष्ट सखि, इदानीं देवीपूजनार्थमादिष्टवान् खलु तत्रभवान् राजा। तत: तस्य व्यपदेशेन प्रमदवनमेव शीघ्रं प्रविशाम:।

नायि- सहोओ जह मणं तुह्माणम्।

(छाया)-सख्यौ, यथा मनो युवयो:।

(सहर्षमुत्थाय सह सखीभ्यां प्रमदवनप्रवेशं नाटयित्वा)

सहीओ इदो वरं करेह्म।

(छाया)-सख्यौ, इत: परं किं कुर्म:।

सख्यौ-सहि, इदं हि देवीए मन्दिरम्।

पूजोवकरणाणअणपज्जन्तं एद्धपुरोभअभहिअमणिमण्डवे खणं णिवसह्म।

(छाया)-सखि, इदं हि देव्या मन्दिरम्। पूजोपकरणानयनपर्यन्तं अत्र पुरोभागस्फटिकमणिमण्टपे क्षणं निवसाम:।

(सर्वा उपवेशं नाटयन्ति)

सत्य- भअसदि, एव्वं एव्व मालिणीवि अह्मसामिणो चरिअं अणुकादुं किं पहवदि?

(छाया)-भगवति एवमेव मालिन्यपि अस्मत्स्वामिनश्चरितं अनुकर्तुं किं प्रभवति?

कात्या- देवि किमुक्तेन देवस्य तादात्म्य मेवावलोकयिष्यसि।

कला-(जनान्तिकम्)भो देव अयं अह्मसमओ जहपुव्वं अणुकरेदु सव्वं सामी।

(छाया)-भो देवअयमस्मत्समयः। यथापूर्वमनुकरोतु सर्वं स्वामी।

देवः- हन्त, पुण्यवानस्मि यत्पुनरहमेताद्दशानन्दमनुभवामि।

(नेपथ्ये)

भो भो देवि, प्रकृतनायिकानिहितचित्तवृत्तिः द्वारकानाथरूप-मवधारयतु भवती।

(ततः प्रविशति देवो विदूषकश्च)

देवः- (सानुरागं विभाव्य)

अधरयति भावमन्यं
दयिततमानिहितभावना नितराम्।
मदयति च मम स्वान्तं
मज्जयति सुधासु चात्मसर्वस्वम्।।

सत्य- (निर्वर्ण्य) (सविमर्शलज्जम्)

अह्मो भअवदि कहं दाणिं एत्थ देवो निअ।

(छाया)-अहो भगवति कथमिदानीमत्र देव इव।

(सचकितम्)उत्थतुमिच्छति)

कात्या-(आत्मगतम्) आ कथमत्रोपायः।

(प्रकाशम्)(विहस्य) हा देवि,मा भैषीः। कृतं कातर्येण। किं न वेत्सि मे शिल्पम्। (पाणौ गृहीत्वोपनिवेशयति)

चाम- देवि, पसिद्धं हि भअवदीए सिप्पचाउरीमाहप्पम्।

(छाया)-देवि प्रसिद्धं हि भगवत्याः शिल्पचातुरीमाहात्म्यम्।

सत्य- होदु भअवदीभसिदं एव्व पमाणम्।

(छाया)-भवतु भगवती तमेव प्रमाणम्।

देव:-(स्वगतम्) आश्चर्य भगवत्या: कपटनाटकचातुर्यं यदसंशयं चकार हृदयं देव्या:।

(प्रकाशम्) (विचिन्त्य) शृणु सखे

तन्नेत्रं यद्वधूटीमनुभवति सदा सम्यगापादकेशं
तध्द्राणं यत्तु जिघ्रत्यलिककचगले साधु भूयोऽपि भूय:।
तद्गात्रं यत्तु धत्ते प्रतिकलमबला, सारसज्ञा रसज्ञा
या चुम्बत्यम्बुजाक्षीमधरकिसलये चूचुके बाहुमूले।।

विदू- भो देव तुमं एव्वं सव्वधा देवी जहमणरहंपलवन्तो चिट्ठसि। अहं उण मोदअखण्डझाणेण रत्तिंदिवं विणिद्दो पळवामि। एद्ध को उवाओ।

(छाया)-भो देव, त्वमेवं सर्वदा देवीं यथामनोरथं प्रलपन् तिष्ठसि। अहं पुन:मोदकखण्डध्यानेन रात्रिन्दिवं विनिद्र: प्रलपामि। अत्र क उपाय:।

सत्य-(विहस्य) अच्चरियं विदूसआणु आरो कलावदीए।

(छाया)-आश्चर्यं विदूषकानुकार: कलावत्या:।

चाम-देवि, घटपुलअण्णाअ सिद्धो खु भअवदीए पहावो।

(छाया)-घटपुलकन्यायसिद्ध: खलु भगवत्या: प्रभाव:।

देव:- पश्य सखे-

नितान्तं दूरे सा निजमिह न चेत: प्रभवति
स्थितं चिन्तामात्रं न तु शरणमात्तं तदुचितम्।
दुरूहं प्रत्यूहं सृजति च कथं दैवमदयं
न जाने कान्तां तामनुभवितुमास्ते क्व सुकृती ।।

सत्य- (सविमर्शम्) भो भअवदि कहिं हि जादं किं एदाणं पुव्वं अण्णोदंसणम्।

(छाया)-भो भगवति कस्मिन्नपि जातं किमेतयोः पूर्वमन्योन्यदर्शनम्।

कात्या- देवि, परस्परचित्रपटदर्शनगुणश्रवणाभ्यामेव जातः पूर्वमुभयोर्महाननुभवः।

चाम- देवि कहं अण्णहा विरहभावणा एआरी होइ।

(छाया)-देवि, कथमन्यथा विरहभावना एतादृशी भवति।

विदू- देव होन्तं अन्तरेण को अण्णो सुकिदी चिट्ठदि।

(छाया)-देव, भवन्तमन्तरेण कोऽन्यः सुकृती तिष्टति।

(प्रविश्य)

दौवरिकः- जय जय स्वामिन् विदर्भदेशीयो द्विजः द्वारमध्यास्ते।

देवः- अपि नाम जीविकासन्दिष्टो भवेत।

विदू- होदु पेच्छह्म।अये सिध्धं पवेसेहि तम्।

(छाया)-भवतु, पश्यामः। अये शीघ्रं प्रवेशय तम्।

दौ- तथा। (इति निष्क्रान्तः)

(ततः प्रविश्य)

द्विजः-(हस्तपुटमुद्यम्य) विजयतां द्वारकानायकः स्वामी।

देवः- (सानन्दम्) ब्रह्मन् इतः परिष्क्रियतां पर्यङ्कभूमिः। अपि नाम ज्ञायते किमपि वृत्तं विदर्भराजनन्दिन्याः।

द्विजः-(उपविश्य) स्वामिन्नयमेव स्पष्टीकरिष्याति।

(लेखमर्पयति)

देवः-(सबहुमानम्) ब्रह्मन्। किमयं तयैव प्रेषितः।

द्विजः- स्वामिन्, लिखितश्च।

देवः- (सकौतुकम्) कथं सखे वाचय।

(इति विदूषकमाज्ञापयति)

विदू- (लेखमुन्मुच्यावलोक्य) सुणाहि देव।

बाळलआणवलंबा
तावभएण तरलज्ज तम्मन्ती।
सअमपि भूअळजादा
कंखदि ह ह देव कप्पतरुजोअम्।

(छाया)-शृणु देव

बाललतानवलम्बा
तापभयेन तरलाद्य ताम्यन्ती।
स्वयमपि भूतलजाता
काङ्क्ष०ति ह ह देव कल्पतरुयोगम्।।

देवः-(निश्वस्य) सखे, तापभयेनेति मर्म स्पृशति।

द्विजः- देव कल्पतरुयोगभावनयैव धारयति जीवितमिदानीम्।

विदू- (पुनर्विलोक्य) देव अण्णो वि लिहिदो भावगंभीरसुलोओ।

(छाया)-देव, अन्योऽपि लिखितः भावगम्भीरः श्लोकः।

देवः-कथं (2) सखे।

विदू-

को तुं पोढवहूकडक्खजमिओ काहं अ दूरट्ठिआ
सिध्धं तावअसंगमेक्कफलअं जम्मन्तरं वा हवे।
इत्थं णिण्णअएवि मं पडिपदं सं ओजअंतिव्व दे.
धत्ते संपडि भावणा पिअसही तद्धंतराअं मुहा।।

(छाया)-कस्त्वं प्रौढवधूकटाक्षयमितः काहं च दूरस्थिता
शीघ्रं तावकसङ्गमैकफलकं जन्मान्तरं वा भवेत्।

इत्थं निर्णयकेऽपि मां प्रतिपदं संयोजयन्तीव ते
धत्ते सम्प्रति भावना प्रियसखी तत्रान्तरायं मुधा ।।

देव:-(सहर्षम्) हन्त, महानयं निर्वेद: कुमारिमाजनस्य।

द्विज:- अन्यदप्यवधारयतु तदवस्थासूचकं तत्सखीलिखितं स्वामी।

विदू-(लेखं विलोक्य)

णीस्सासग्गविदा ण मे सहअरी जाणादि णिद्दासुहं
बप्पोहेण महाणदीं विधई दीणा दिसं पेच्छदि।
मुद्धच्छी मुदि आ सअं हसइ हाणादेति सल्लाविणी
रूवं दे लिहइह मुच्छति पुणो झाणे परं लज्जइ।।

(छाया)-

निश्वासग्लपिता नमे सहचरी जानाति निद्रासुखं
बाष्पौघेन महानदीं विदधती दीना दिशं पश्यति।
मुग्धाक्षी मुदिता स्वयं हसति हा नाथेति सल्लापिनी
रूपं ते लिखतीह मुर्छति पुनर्ध्याने परं लज्जते।।

देव:-(सनिश्वासं विचिन्त्य)

स नृपतिरनभिज्ञस्तस्य देवी तु साध्वी
विमतपरिणये तु श्रुयते किंवदन्ती ।
तदपि मम च चेत: त्रायते जीविताशां
प्रतिपदमनुचिन्त्य प्रेयसीभावंबद्धम् ।।

भवतु, सखे सपदि कथय कथमिह विदर्भदेशं गन्तुमभ्युपाय:।

विदू-(विचिन्त्य)(सहर्षम्) भो देव अपुव्वं कह किं वि पडिभइ। सिघ्घं एव्व कित्तिमपक्षं पासे बन्धिअ उड्डेहि। अहं तु तह चरणं ओलंबिअ गळुळचरणगहीदभुजगरीई अणुकरेह्मि।

(छाया)-भो देव अपूर्व मम किमपि प्रतिभाति। शीघ्रमेव कृत्रिमपक्षं पार्श्वे बध्द्वा उत्तिष्ठ ।अहं तु तव चरणमवलम्ब्य गरुडचरणगृहीतभुजगरीतिमनुकरोमि।

सत्य- (सस्मितम्) भअवदि इअं सव्वहा बम्मवेंी एव्व।

(छाया)-भगवति इयं सर्वथा ब्रह्मवेद्येव।

कात्या-(सहर्ष पश्यति)

द्विज:- देव किमन्यदिह कालकलापि कल्प शतकल्पायत इति वाचिकमपि तत्रभावत्या:। तदिह कृतं विलम्बेन।शीघ्रमयमारुह्मतां रथ: ।

(इति रथं दर्शयति)

देव:-(साश्चर्यानन्दम्) ब्रह्मन् सत्यमप्रतिहतसङ्क.ल्पोऽसि यस्य ते मनोरथ एव जातो रथ:।

(सपदि रथमारुह्म)

ब्रह्मन् त्वर्यतां त्वर्यताम् ।

द्विज:-(रथोत्थानवेगं निरूप्य) अहो सपदि सम्पादितमनोरथोऽयं रथ: यदनेन वयममी निमेषार्धदेव विदर्भराजाजधानीमागता: स्म:। (भुवमङ्गल्या निर्दिश्य) इह पश्यतु

स्वामी-

मध्येपुरं जयति मन्दिरमस्य राज्ञ:
सौवर्णसौधशिखराग्रचलत्पताकम्।
केलीवनं कलय तत्पुरत: कुमार्या:
सङ्केतमण्डपमित: सरसीप्रतीरे ।।

विदू- (निर्वर्ण्य)(सपुलकम्) देव, पेच्छ पेच्छ, अदिट्ठचरं किं एदम् तेजोणिधाणं दट्ठुं वि ण पारेमि।

(छाया)-देव पश्य पश्य अदृष्टचरं किमेतत् तेजोनिधानं द्रष्टुमपि न पश्यामि ।

देवः-(सकुतुकमवलोक्य) पश्य सखे परमाद्भुतमिदम् ।

क्वचिन्नीलाम्भोदं क्वचिदमलचन्द्रं कुवलये
क्वचिद्बिम्बं शङ्ख क्वचिदपि लते पद्ममुकुलौ ।
महावर्त रम्भे क्व नु किसलये क्वापि विदधत्
किमप्येतत्तेजः स्फुरति न पदं वाङ्मनसयोः।।

द्विजः-(सहर्षम्) पश्यतु देव भवानियमेव सा राजकन्यका सङ्केतसदने सह सखीभ्यां किमपि मन्त्रयन्ती तिष्ठति ।

देवः-(सत्वरम्) ब्रह्मन्, तर्हि सपदि रथमवतार्य क्वचिन्निकुञ्जे निलीनाः समयमवलोकयिष्यामः।

द्विजः- तथा ।

(इति निकटकुञ्जमध्ये रथावतरणं नाटयति)

सख्यौ- हला रुप्पिणि अळं णिरन्दराए चिन्दाए। उट्ठेहि, सज्जाइ पूजोवअरणाइ। अह्मदेवीपूजणं करेह्म। सा एव्व भअवदी खणमेत्तेण पडिऊळं निराकरिअयदुवारआणाहं तुए सह घडइस्सदि।

(छाया)-हला रुक्मिणि, अलं निन्तरया चिन्तया। उत्तिष्ठ। सज्जानि पूजोपकरणानि। अस्मद्देवीपूजनं कुर्मः। सैव भगवती क्षणमात्रेण प्रतिकूलं निराकृत्य द्वाराकानाथं त्वया सह घटयिष्यति।

नायि- अह्मो सहिओ किं करेह्म। अज्ज वि ण जाणिज्जए बह्मणस्स उत्तन्तो वि।

(छाया)- अहो सख्यौ, किं कुर्मः। अद्यापि न ज्ञायते व्राह्मणस्य वृत्तान्तोऽपि।

(संस्कृतमाश्रित्य)

अपि मयि करुणा स्यात्तस्य देवस्य भूयः
कलयति निजचित्ते किन्नु दैवं न जाने।
इह परमतिमात्रं वेपते जीवितं हा
दहति हृदयमन्तर्दारुणः कोऽपि तापः ।।

द्विजः (देवं पश्यति)

देवः-(सहर्षम्)(जनान्तिकम्) हन्त पुण्यवानहम्। प्रियतमानुगृहीतोऽस्मि।

(ततः प्रविश्य)

वर्षवरः- अह्मो भट्टिदारिए, पाणिग्गहणसमओ अदिक्काम इत्ति परिजणेण उज्जाणदुवारं आसादिअ तुवरेदि अमच्चो महारायस्स।

(छाया)-अहो भर्तृदारिके, पाणिग्रहणसमयोऽतिकामत इति परिजनेनोद्यानद्वारमासाद्य त्वरयत्यमात्यो महाराजस्य ।

देवः-(सविषादं द्विजं पश्यति)

विदू-देव कहं अण्णहा चिन्तिदं देवेण।

(छाया)-देवकथमन्यथा चिन्तितं दैवेन; शृणुमस्तावत्।

सख्यौ-(सास्रम्) हला रुप्पिणि इदो वरं किं करेह्म।

(छाया)-हला रुक्मिणि इतः परं किं कुर्मः।

(आश्लिष्यतः)

नायिका- (निश्वस्य)होदु सहीओ इदो वरं किं करिस्सदि देव्वम् ।

(छाया)- भवतु सख्यौ इत: परं किं करिष्यति दैवम्।

(पदान्तरं गत्वा वर्षवरं विलोक्य)

अए पूजासेसं करिअ इदो झत्ति आाअच्छह्मित्ति फणाहि। आहि।

(छाया)-अये पूजाशेषं कृत्वा इतो झडित्यागच्छामीति भण। याहि।

(परिवृत्य) हला सहीओ "ओसिअे अणुहोदव्वं किदं कम्म सुहासुहम"। अदो कि ं एदेण विलंबेण। जाव अहं पूजं करिअ जम्मन्तरे वा होदु देवसमाअमोत्ति भअवदिं अभीत्थिअ आअच्छाह्मि । तावपज्जन्तं तुम्ह्मे एद्ध दुवारं हि सावहाणं चिट्ठह। जो को वि मज्झे अन्तरायं करिस्सादि।

(छाया)-हला सख्यौ "अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्"। अत: किमेतेन विलम्बेन। यावदहं पूजां कृत्वा "जन्मान्तरे वा भवतु देवसमागम" इति भगवतीमभ्यर्थ्यागच्छामि तावत्पर्यन्तं युवामत्र द्वारे सावधानं तिष्ठथ:। य: कोऽपि मध्ये अन्तरायं करिष्यति।

सख्यौ- (सहर्षम्) होदु सहि, विण्णाणवदी खु होदी। देवीं अभीत्थिअ सिध्धं आगच्छ। गच्छह्म।

(छाया)-भवतु सखि। विज्ञानवती खलु भवती। देवीमभ्यर्थ्य शीघ्रमागच्छ। गच्छाम:।

(इति द्वारदेशे तिष्ठत:)

नायि-(गर्भगृहं प्रविश्य पुष्पाञ्जलिं विकीर्य प्रणम्योत्थाय) (संस्कृतमाश्रित्य)

देवि दयाभरिते मां
दयितजनं नय भवान्तरे वापि।
इह देहसमर्पणतो
भवतु च पूरितमनोरथा भवती ।।

(निश्वस्य) हा देव द्वारकानाथ त्वामेव शरणं गता।
कदा मयि कृपां नाथ करिष्यसि कृपानिधे।।

(परिवृत्य लतयोद्बन्धनं नाटयति)

सख्यौ- (निर्वर्ण्य ससम्भ्रमम्) हा माद हा ताद, हा देवि, किं करेह्मि। उद्बन्धेणे चिट्ठदि अह्मपिअसही।

(छाया)-हा मातः, हा तात, हा देचि, किं कुर्वः।
उद्बन्धने तिष्ठत्यस्मत्प्रियसखी।

(सत्वरमुपसृत्य नायिकामाश्लिष्य)

(आकाशमवलोक्य)

हाकृष्ण द्वारकानाथ क्वासि यादवनन्दन।
इमामवस्थां सम्प्राप्तामनाथां किमुपेक्षसे ।।

(इति क्रन्दतः)

देवः-(आकर्ण्य) (सविषादम्) सखे, ध्रुवमतिसङ्कटे वर्तते कल्याणी।

विदू-को सन्देहो।

(छाया)- कः सन्देहः।

द्विजः-त्वर्यतां त्वर्यताम् । उचितोऽयमवसरः परित्रातुम्।

देवः-(रथादवतीर्य) कः कोऽत्र भोः।

(इत्युपसर्पति)

पद्मि-(निर्वर्ण्य)(सानन्दाश्चर्यम्) सहि अच्चरिअम। पेच्छ भअवदीए पसादम् जं सो एव्व देवो चिन्तिअमेत्तेण उवाअदो।

(छाया)-सख्याश्चर्य पश्य भगवत्याः प्रसादम् यत्स,एव देवः चिन्तितमात्रेणोपागतः।

कुमु- (सामोदम्)(अवलोक्य) अह्महे दीणबन्धू खु अह्मसामी।
(छाया)-अहो दीनबन्धुः खल्वस्मत्स्वामी।

पद्मि- (सस्मितम्) देव तुरिदं जीवेहि णं अह्मपिअसहिम्।
(छाया)-देव, त्वरितं जीवयैनामस्मत्प्रियसखीम्।

देवः-(सहर्षम्) (उपसृत्य सपुलकमाश्लिष्य उद्बन्धनादुन्मुच्य)

हा देवि हा तरुणि हा दयिते वराङ्गि.
हा जीविके सुदति हा हरिणायताक्षि ।
कल्याण्ययं परिजनः कलितोऽद्य सोऽहं
मां पश्य मानिनि दयां कुरु मे प्रसीद ।।

(इति मुखमुन्नमयति)

नायि-(उन्मील्यावलोक्य) (सानन्दं) (आत्मगतम्) अह्महे दिट्ठिआ अणुऊलमेव्व णाडआं पवुत्तम्। जद्ध मे दयिआणुकारस्स लद्धं आलिङ्ग.णम्। (प्रकाशम्) अह्मो सहीओ कहं एववं दाणिम् ।

(छाया)-आश्चर्यम् ।दिष्ट्यानुकूलमेव नाटकं प्रवृत्तम् यत्र मे दयितानुकारस्य लब्धमालिङ्गनम् । (प्रकाशम्) अहो सख्यौ कथमेवामिदानीम्।

(सलज्जमालिङ्गनं परित्यज्य अधोमुखी तिष्टति)

सख्यौ- सहि रुप्पिणि, पेच्छ पेच्छ, उवणदं अह्मदेवीपूजाफलम्। कुदो णदमुखी चिट्ठसि।

(छाया)-सखि रुक्मिणि, पश्य पश्य, उपनतमस्मद्देवीपूजाफलम्। कुतो नतमुखी तिष्ठसि।

नायि-(सलज्जास्मितम्) "दुट्ठंहि रायउळं ति वेवइ मणं, किं करेह्मि सहि।

(छाया)-दुष्टं हि राजकुलमिति वेपते मनः किं करोमि सखि।

(इति सानुरागं देवं पश्यति)

देव:- (आत्म) धन्योऽस्मि। किमत्र विलम्बेन। (प्रकाशम्) एहि देवि मा भैषिः।

(इति सह सखीभ्यां नायिकामाश्लिष्यन् रथमारोप्य)

ब्रह्मन्। त्वर्यतां त्वर्यतां रथः क्षणमात्रेण द्वारवतीं पुनः परिष्करोतु।

द्विजः- तथा। (इति रथयानं नाटयति)

सत्य- (सबहुमानम्) अच्चरिअं अच्चरिअं भआवदीए सन्दब्भकप्पणाचाउरीअम्। जं अदिट्ठचरं वि एदं खणमेत्तेण सविसेसं पच्चक्खं कुणइ ।

(छाया)-आश्चर्यम् आश्चर्यम् भगवत्याः सन्दर्भकल्पनाचातुर्यम् यददृष्टचरमप्येतत् क्षणमात्रेण सविशेषं प्रत्यक्षं कुरुते ।

कात्या- (सप्रश्रयम्)

देवि लोकोत्तरं वस्तु वक्तुर्दिशति चातुरीम्।
वसन्तः किन्न कुरुते कोकिलां मञ्जुवादिनीम् ।।

अत्रान्तरे ब्रह्मवेदी- ही ही अब्बम्मण्णं अब्बम्मण्णम्। (इति घुष्यन् उपरितलादधः पतन् लुठति।)

(छाया)- ही ही अब्रह्मण्यं अब्रह्मण्यं।

सत्य- (सचकितम्) अह्मो परित्तहि भअवदि परित्ताहि को वि बह्मरख्खसो बअणादो पडिदो उवदावहि ।

(छाया)-अहो परित्रायस्व भगवति परित्रायस्व कोऽपि ब्रह्मराक्षसः गगनात्पतितः उपधावति ।

(कात्यायनीमाश्लिषति)

नायि-(निर्वर्ण्य) (सभयकम्पम्) हा सहि मालिणि परित्ताहि परित्ताहि भूदमुहपरिग्गहादो।

(छाया)-हा सखि मालिनि, परित्रायस्वपरित्रायस्व भूतमुखपरिग्रहात्।

(सत्वरं देवमालिङ्गति)

देव:- (सहर्षरोमाञ्चम्) एहि सखि मानिनि मा भैषी:। (इति सानन्दमाश्लिष्यति)

(सर्वे यथायथं पलायन्ति)

कात्या- (सधैर्य कम्बलमपनीय विहस्य)
देवि,पश्य पश्य कृतं कातर्येण।

क- (निर्वर्ण्य) अह्मो अयं बह्मवेदी जादो।

(छाया)-अहो अयं ब्रह्मवेदी जात:।

सत्य-(उपसृत्य विलोक्य सस्मितम्)
अए हदास कहं अज्ज गअणादो पडिओ तुमम्।
(छाया)-अये हताश कथमद्य गगनात्पतितस्त्वम्।

विदू-(सभयम्) भो देवि, एद्ध णट्टदंसणत्थं केवलकुण्ठिअसव्वङ्गां एको एव्व उवरितलं आरुहिअ खणेण निद्दं गओ। तदो सिविणए पुरदो दुव्वाणरेण पच्छा घोरभल्लएण वि गलग्गांहं गहिदो इदो तदो भअसंभमेण लुठंतो पडिओ। किं करेह्मि सव्वाइ अङ्गाइ भंगाइ।

(छाया)-भो देवि अत्र नाट्यदर्शनार्थं कम्बलकुण्ठितसर्वाङ्ग: एक एवोपरितलमारुह्य क्षणेन निद्रां गत:। तत: स्वप्ने पुरतो दुष्टवानरेण पश्चात् घोरभल्लूकेनापि गलग्राहं गृहीत:

इतस्ततो भयसम्भ्रमेण लुठन् पतितः। किं करोमि। सर्वाण्यङ्गानि भग्नानि।

(इति रोदिति)

सत्य- (सविमर्शम्) अये विण्णाणहीण चिट्ठदु एदम्। कुदो देवो। फणाहि सच्चेण।

(छाया)-अये विज्ञानहीन तिष्ठत्वेतत्। कुतो देवः भण सत्येन।

विदू- (सचकितम्) होदि सुरङ्गामुहेण सो रङ्गसाक्कं पविट्ठो विअ चिट्ठइ।

(छाया)-भवति सुरङ्गामुखेन सो रङ्गशालां प्रविष्ट इव तिष्टति।

सत्य-(सपदि परिवृत्य देवं निर्वर्ण्य सचकितम्) (स्वगतम्) हा हंद ए दावपज्जन्तं मलअवदीए गोवणस्स किन्दि फलं जादम्। (प्रकाशम्) अह्मो भअवदि किं करेह्मि।कहं वि जादं णिण्णीदं खु मए पुव्वं एव्व। (सविषादम्) वचिअं खु तुए सव्वहा णाडआरंभेण।

(छाया)- हा हन्त, एतावत्पर्यन्तं मलयवतीगोपनस्य किमिति फलं जातम्। (प्रकाशम्) अहो भगवति किं करोमि। कथमिव जातम्। निर्णीते खलु मया पूर्वमेव। (सविषादम्) वञ्चितं खलु त्वया सर्वथा नाटकारम्भेण।

(सास्त्रं भूमिमङ्गु.ष्ठेन लिखति)

कात्या- (स्वगतम्) कथमत्रोपायः।

(प्रकाशम्) भो देवि कोनु जानाति ते भर्तुश्चारित्रम्।

सत्य- (सरोषं मलयवतीमवलोक्य) हा मुद्धे होदु। गूढपावचारिणि मं एव्वं वञ्चिऊण कहं पउत्तासि। अहव चोडित्तणजोग्गाए कहं बहुमदी।

(छाया)- हा मुग्धे, भवतु, गूढपापचरिणि मामेवं वञ्चयित्वा कथं प्रवृत्तासि। अथवा चेटित्वे,योग्यायाः कथं बहुमतिः।

मल- (सभयसम्भ्रमं देवं विधूय) अह्मो देवि तुह्मपदेण सवामि।मइ मा कुप्प कुप्प अहंकिं वि ण जाणे। सच्चं मालिणित्ति केवलं आलिङ्गिअ ठि अह्मि।

(छाया)-अहो देवि, युष्पत्पदेन शपे । मयि मा कोपय कोपय अहं किमपि न जाने। सत्यं मालिनीति केवलं आलिङ्ग्य स्थितास्मि ।

(सास्रगद्गदमधोमुखी तिष्ठति)

सत्य- (दीर्घ्र निश्वस्य) हा णिसग्गं साहसए तुह कुल योग्गं एव्व किं वि पळवसि।

(छाया)-हा निसर्गसाहसिके, तव कुलयोग्यमेव किमपि प्रलपसि।

कात्य-(सधाष्टर्चम्) भो देवि, कृतं कोपेन। सैषा खलु बालिशा किन्नु जानासि।

सत्य-(अश्रवणं नाटयन्ती) सहि मन्छारिए इमं चेडिं सिध्धं एव्व काराघरे बन्धेहि।

(छाया)-सखि मन्दारिके इमां चेटीं शीघ्रमेव कारागृहे बधान।

मन्दा- (सभयम्) जं आदिसदि देवी।

(छाया)-यदादिशति देवी।

(इति मलयवतीमादाय निष्क्रामति)

देवः-(सकातर्यम् उपसृत्य) (स्वगतम्) कथमनुनयोपायः। (प्रकाशम्) भे देवी,साधु कुतं नटनपरिश्रान्तायाः पारितोषिकम् (सस्मितं मुखमुन्नमयति)

सत्य-(सनिश्वासं निर्वर्ण्य) देव, गच्छ गच्छ,जाणे दे वअणपण्डिच्चम्।

(छाया)-देव, गच्छ गच्छ जाने ते वचनपाण्डित्यम्।

(परिवृत्य निष्ठति)

देव:- (सानुनयानुरागम्)

मानं विमुञ्च मदिराक्षि समेधमानं
दीनं विलोक्य शनैरितरानधीनम्।
कोपं गता यदि तदा कुरु मेऽनुरूपं
गूढं यथेछमिह दण्डनमाशु गूढम्।।

(इति हस्तं गृह्णाति)

सत्य-(कात्यायनीं विलोक्य) भो भअवदि कुदो मुहा मं आउलीकरेदि महाभाओ। का उण कुप्पइ काए कोवो दण्डिदुं पहवइ। पच्चुद देवं एव्व कुप्पदि को वि किं करिस्सदि।

(छाया)-भो भगवति कुतो मुधा मामाकुलीकरोति महाभागः। का पुनः कुप्यति। कस्याः कोपः कं दण्डयितुं प्रभवति। प्रत्युत देवमेव कुप्यति कोऽपि किं कष्यिाति।

(इंति नखैरश्रूणि विक्षिपति)

कात्या-पश्य, कोपने, युक्तं न जानासि।

मधुकलमधुपः किं मञ्जरीमेव भुङ्क्ते
पिबति किल सरागं पद्मिनीवक्त्रसरम्।
निधिरति धनिनापि त्यज्यते किन्तु लब्धः
परिहर सखि मानं प्राधनाथे प्रसीद।।

सत्य-(विहस्य)भअवदि कहं मह वि कोवो।

(छाया)-भगवति कथं ममापि कोपः।

देवः- अये भामिनि-

ऋजुरपि तव दृष्टी रक्तिमानं विधत्तं
मधुरुचिरपि वाणी प्रस्खलत्येव भूयः ।
सहवितमपि वक्त्रं सान्द्रनिश्वासगर्भ
कथय सुदति कोऽयं कोपवेगप्रकारः ।।

(सानुनयं चिबुकमवलम्ब्य) अय देवि, क्षमस्व सर्वमप्यपराधम्। प्रसीद प्रसीद प्रिये।

(सरोमञ्चं पदावलम्बं नाटयति)

सत्य-(सोद्वेगं नाटयेन परिहृत्य) भो भअवदि पेच्छ पेच्छ, एवंपरिहासभाआणं जादम्मि। उट्ठेहि वासघरं गच्छह्म।

(छाया)-भो भगवति, पश्य पश्य। एवं परिहासभाजनं जातास्मि। उत्तिष्ठ, वासगृहं गच्छामः।

(इति परिजनेन सह निष्क्रामति)

देवः-(निश्वस्य) हन्त, किमितः परं सर्वथा कुपितैव देवी। (विदूषकमवलोक्य) अये चपल, कुतस्त्वमेवं पतितोऽसि।

(पदान्तरं गत्वा विचिन्त्य सनिर्वेदम्)

मदर्थं बाला सा घनविपदि देव्यापि निहिता
स्वयं रुष्टा देवी किमिति विधिरेवं विनतुते।
मुधा जातक्लेशः तव हृदय तस्यां मम मृते
तयापि त्वं कस्मात्कटिन भण मां न त्यजासि किम्।।

(इति निष्क्रान्ताः सर्वे)

इति श्रीमुष्णनगरनिवासि कौण्डिनयकुलतिलकाथमानश्रीमद्वीरवल्लिवरदनारायणगुरुवरतनय श्रीनिवासमहाबुधगुरुकृतिषु वकुलमालिनीपरिणये तृतीयोऽङ्कः

(अम्बुजवल्ल्यै नमः)

।।श्रीः।।

।। अथ चतुर्थोऽङ्कः प्रारभ्यते ।।

(ततः प्रविशति दौवारिकः)

गमनं नाटयन्-

अमात्यागमवृत्तान्तकथनेन कदा पुनः ।
स्वामिनं तोषयिष्यामि चिन्तामन्थरचेतसम् ।।

(पुरोऽवलोक्य सहर्षम्)

अयमित एव स्वामी क्लान्तः कमलाविलासपर्यन्ते स्वयमेव सनिश्वासं किमपि च कुतुकेन मन्त्रयन्नास्ते। तदत्रैव तिष्ठन्नुचितं पश्यामि समये स्थितः।

(ततः प्रविशति यथानिर्दिष्टो देवः)

देवः-

तदेव श्रेयो मे तदलमिह भूम्ने मम मुदां
किमन्यद्वक्तव्यं समजनि ततो जन्म सफलम्।
यदारादेणाक्ष्या घनचकितमालिङ्ग्य सुदृढं
परित्रायस्वेति स्खलितपदमालोक्य जगदे ।।

(पुनर्विभाव्य)

कुतः *सा लोलाक्षी पदमशरणोऽयं कुत इति*
प्रकामं निर्वेदात्कथमपि निरुद्धं मम मनः ।
तदीयं सौन्दर्यं स्वयमत इतःकर्षति बला -
त्किमेतत्किं ध्येयं किमु शरणमन्यत्प्रभवति।।

(परोऽवलोक्य)

वयस्य कथं सुघटितसर्वाङ्गो हृष्ट इव लक्ष्यसे ।

(प्रविश्य)

विदूषकः- भो देव सव्वं भद्दं सव्वम्। सुणाहि देव चेडिआवि कलावदी मह मादव्व। जा उण मं अन्तेउरं पावऊण भअवदीदिण्णेण ओसहेण खणमेत्ते दिढसरीरं करिअं उदरं वि आपूरिअ पेसिदवदी आसी।

(छाया)- भो देव सर्वं भद्रं सर्वम्। शृणु देव, चेटिकापि कलावती। मम मातैव। या पुनर्मामन्तः पुरं प्रापय्य भगवतीदत्तेनौषधेन क्षणमात्रे दृढशरीरं कृत्वा उदरमप्यापूर्य प्रेषितवत्यासीत्।

देवः- (सस्मितम्) अस्तु सखे कलावती तव माता मातामही वा। अपि विचारितं किमापि देवीवृत्तम्। वयस्य, किं करोमि-

यदेषा कल्याणी प्रणतमपि मां मौनमधुरं
सबाष्पं निश्वस्य क्षणमिव निरीक्ष्याशु चलिता ।
तदेकं मे चेतः स्थगयति मुदा घूर्णयति हा
मुहुः कर्षत्यन्तः सुखयति परं खेदयति च ।।

विदू-(साट्टहासम्) देव ताणिमिच्चं माभआहि। दाणिं ताए वि देरीए तुह पाअपडणसमओ जादो।

(छाया)-देव तन्निमित्तं मा भय भैषीः इदानीं तस्या अपि देव्याः तिव पादपतनसमयो जातः।

देवः- (सहर्षम्) सखे, तत्कथमिव।

विदू- देव दाणिं केणवि वरिसवरेण आणीदं लेहं आलोइअ अच्चन्दविसण्णाहिअआ देवी तुए समं किं वि मन्तिदुं समअं आलोअअ चिट्ठदि।

(छाया)-देवेदानीं केनापि वर्षवरेणानीतं लेखमवलोक्य

अत्यन्तविषण्णहृदया देवी त्वया समं किमपि मन्तयितुं समयमवलोकयन्ती तिष्ठति।

देव:-सखे, किन्नु भविष्यति।

विदू- खणेण सव्वं पट्ठं भविस्सदि। परं दु मलअवदी घणबन्धणे चिट्ठदित्ति एक्क एव्व सल्लं हिं अअस्य।

(छाया)-क्षणेन सर्वं स्पष्टं भविष्यति। परन्तु मलयवती घननन्धने तिष्ठतीत्येकमेव शल्यं हृदयस्य।

देव:- (सनिश्वासम्) तत्किन्नु भणामि। शृणु सखे हृदयम्।

यदा दृष्ट:प्रेम्णा सदहसितं पक्ष्मलदृशा
तदैवासं धन्य: तदिह न भयं कुत्रचिदपि।
तथापि प्रयस्याश्चमितनयनं चञ्चदधरं
गलब्दाष्पं क्लान्तं मुखकमलमन्तर्विदहति।।

(उपसृत्य दौवारिक:)

दौवारिक:- जय जय देव, महाराजकारिवसोरमात्य: समयमीक्षते स्वामिन:।

देव:-(साश्चर्यानन्दम्) अये स किल सिद्धयोग:। सपदि प्रवेशय तम्।

दौवा- तथा। (इति निष्क्रान्त:)

(तत: प्रविशति सिद्धयोग:)

सिद्ध-(सलज्जम्)

"कथमेतादृशावस्थां कथयिष्यामि निस्तपम् अथवा देव एवायं स्वतन्त्र: सर्वकारणम्"।। (उपसृत्य) विजयी भवतु स्वामी।

(सविनयं प्रणम्योत्थाय बद्धाञ्जलिस्तिष्ठति)

देवः-(सहर्षम्) इत इतः समुपविशत्वमात्यः।

विदू- भो अमच्च इदं दे आसनम्।

(छाया)-भो अमात्य इदं ते आसनम्।

(इत्युत्तरीयं प्रसारयति)

सिद्ध-यदादिशति स्वामी।

(सविनयमुपविशति)

देवः-(सबहुमानम्) भो स्वागतममात्यानाम्। अपि कुशलं तत्रभग्रवतो महाराजस्य।

सिद्ध-(सप्रश्रयम्) स्वामिनः प्रसादात् भविष्यत्येव कुशलं सर्वमपि।

विदू-(सविमर्शम्) अमच्च, किं वि अच्चाहिदं विअ पडिभाइ।

(छाया)-अमात्य, किमप्यत्याहितमिव प्रतिभाति।

सिद्ध- अथ किम्?

देवः-(सकातर्यम्) अये कथं कथं नु तत्?

सिद्ध- देव, ज्ञायते खलु राजा,विजयधन्वा।

विदू-अह्मो जाणे सो खु चोळमीविल्लहो।

(छाया)-अहो जाने स खलु चोळमहीवल्लभः।

देवः- *अये किमेतदाश्चर्य तेनैव सह सङ्गरम्।*
कर्तुकामो महाराज इति पूर्व श्रुतं मया ।।

सिद्ध- देव, किमन्यत् ।
कृत्वा च बहुधा युद्धं स्वयमेकः स पार्थिवः।
सर्वानिस्मानवस्कन्द्य स्वकारागृहमानयत् ।।

विदू-देव कहं अमत्ते सिलापाओ।

(छाया)-देव कथं अमत्रे शिलापातः।

देवः:-अये किंनिमित्तोऽयं तयोर्विरोधः।

सिद्ध-देव, किमपरम्।

कन्याप्रतिग्रहमुखात्सन्धिमिच्छन् स पार्थिवः।
राज्यमाक्रमितुं धीरो बलादेवोपचक्रमे ।।

देवः:- सर्वजनसम्भावनीयं हि कन्यका रत्नम्?

विदू- हन्द, इत्थिआ खु वेरकारणं लोअस्स।

(छाया)-हन्त, स्त्री खलु वैरकारणं लोकस्य ।

(देवंदृशां संज्ञाप्य सिद्धयोगमवलोक्य) अये

अमच्च अवि कुसळिणी सा महाराअणन्दणा
जाए उण अह्मदेवो गलग्गाहं गहीदो।

(छाया)-अयि अमात्य, अपि कुशलिनी सा महाराजनन्दना
यस्याः पुनःअस्मद्देवो गलग्राहं गृहीतः।

सिद्ध-(निश्वस्य) हन्त, तत्कथं नु भणामि। सर्वथातिनिष्ठुरमेव दैवम्।

बद्धे स्वयं परिजनेन सहैव शाज्ञि
तत्रान्तरे रिपुजनाधिकृते च राज्ये।
पूजास्थलं गतवती न पुनर्निवृत्ता
सा किं हता क्व नु हृता क्व गता न जाने।।

DEPARTMENT OF ARCHAEOLOGY LIBRARY MADRAS

देवः:- (सविषादमिव पश्यति)

विदू-हन्द फलिअं णणु देवपूजणम् अमच्च नद्धेणवि तुए कुदो विआरिदं एदम्।

(छाया)-हन्त फलितं ननु देवपूजनम्। अमात्य बद्धेनापि त्वया कुतो विचारितमेतत्।

सिद्ध-कथञ्चिन्निर्गतस्सोऽहं मार्गे कमपि दृष्टवान्।
देवी प्रतीह सन्दिष्टो योऽस्मद्राजोन्तमस्त्रिया।।

विदू- सो किं मालवनामा वरिसवरो।
(छाया)-स किं मालवनामा वर्षवर: ।

सिद्ध-अथ किम्?

देव: सखे, नूनमिदमेव देव्या विषादकारणम् ।

विदू- को णु सन्देहो ।
(छाया)-को नु सन्देह:।

देव:-(निश्वस्य) भो अमात्य "भाग्यवन्तमेव फलं प्राप्नोति।

विदू- (पार्श्वेऽवलोक्य) देव, पेच्छ पेच्छ इदो इदो देवी।
(छाया)-देव पश्य पश्य, इत इतो देवी ।

देव:- (निर्वर्ण्य सविषादहर्षम्)

कात्यायनीभुजनिविष्टकृशाङ्गयष्टि:
कर्पूरपाण्डरकपोलविलोलकेशा ।
व्यालोलदृष्टिरधिकश्वसितालसाङ्गी
सैषा मनो हरति गाढकृशापि देवी ।।

(तत: प्रविशति यथानिर्दिष्टा देवी)

देवी-(सास्त्रम्) हन्द कहं विअसंपत्तो लेहो। किं करेह्मि।

सा कीरिसी को णु गआ णु कणीयसी मे
तादोवि वेरिवसगो तरला अ मादा ।
भङ्गाअ सङ्गरकहावि कहं किमण्णं
जादंहि जम्म परिहासपदं जणेसु ।।

(छाया)-हन्त, कथमप्यसम्प्राप्तो लेख: किं करोमि ।

1ष्टनिजाङ्ग.

सा कीदृशी क्व नु गता नु कनीयसी मे
तातोऽपि वैरिवशगस्तरला च माता ।
भग्ना च सङ्गरकथापि कथं किमन्यत्
जातं हि जन्म परिहासपदं जनेषु ।।

कात्या-(स्वगतम्) इदानीमुचितः समयः।

(प्रकाशम्) देवि, मा भैषीः। हितमुपदिशामि ते य दिह रोचते चेतः।

सत्य-कहं भअवदि कहंम्?

(छाया)-कथं भगवति कथम्?

कात्या- (मुखमुन्नमय्य)

कृत्वैनां मलयवतीं देवि
सपदि वकुलमालिनीस्थाने ।
निर्वर्तय प्रतिज्ञां
तोषय देवं ततोऽनुकूलमिदम् ।।

सत्य-साहु जिन्दिदं भअवदीए। परन्दु अरुहति किं एसा वउळमालिनीट्ठाणम्।

(छाया)-साधु चिन्तितं भगवत्या। परन्तु अर्हति किमेषा वकुलमालिनीस्थानम् ।

कात्या-(विहस्य) भो देवि, को भेदः मलयवतीवकुलमालिन्योः?

सत्य-(सानुनयं विचिन्त्य) भअवदि इदं होदु एव्वं दाव।

(छाया)-भगवति इदं भवत्वेवं तावत्।

(संस्कृतमाश्रित्य)

कान्ते प्रसीद मयि मा कुरु मा विमान-
मित्यादिभिर्नवसुधामधरैर्वचोभिः ।

पादे पतन्तमपि हा परिहृत्य देवं
निर्लज्जमेव कथमद्य विलोकयामि ।।

कात्या- देवि मैवं वादी:।सरलहृदयो ननु स्वामी।
पश्य, ते मुखमालोक्य तुष्यति स्वयमेव स: ।
चन्द्रकान्त: कथं चन्द्रे न द्रवत्युदयत्यपि।।

सत्य-(पुरोऽवलोक्य) भअवदि को अअं अदिट्ठचरो देवमासम्मि।
(छाया)-भगवति, कोऽयमदृष्टचरो देवपार्श्वे।

कात्या-(सविमर्शम्) देवि, जाने अयमेव मालवकथितप्रवृत्तिरमात्यसिद्धयोग:।

सत्य-तर्हि अह्मवउळमाळिणीतादाणं उत्तन्दो जाणिज्जइ देवेणेत्ति तक्केमि।

(छाया)-तर्हि अस्मद्बकुलमालिनीतातयोर्वृत्तान्त: ज्ञायते देवेनेति तर्कयामि।

कात्या- क: सन्देह:?

देव:-(पुरोऽव लोक्य)(सस्मितम्) एहि देवि। तव निदेशमाकाङ्क्षमाणस्तिष्ठति जन:। (नाट्येन पाणिं गृह्णाति)

सत्य-(सलज्जमधोमुख्वी तिष्ठति)

कात्या-(मुखमुन्नमय्य)

चन्द्रिकाया: प्रसादेन प्रसन्न: कमलाकर:।
पश्य चित्रमिदं देवि गतिर्दैवी विशृङ्खला ।।

सत्य-(निश्वस्य) कात्यायनी पश्यति।

कात्या- देव,ज्ञायते खलु दाक्षिणात्यो वृत्तान्त:।

देव:-जाने भगवति, जाने । (सत्यभामामवलोक्य)

देवि मैवं विषादस्ते मोचयिष्यामि बन्धनात् ।
क्षणेन पश्य राजानं प्रतिज्ञा ते भविष्यति ।।

(पार्श्वे अवलोक्य) सखे ब्रह्मवेदिन्, सपदि कथय महासेनं "चतुरङ्गनलेन सज्जीभवे"ति।

विदू-तथा। (इति निष्क्रान्तः)

(आकाशे)

कान्तो यास्यति मानायिष्यति च मामङ्के निधायादरा-
दालिङ्ग्याधिमुखं मुखं च घटयन्नश्रु प्रमृज्यादरम्।
चुम्बन्दास्यति मे निजाधरसुधां यास्याम्यहं जीविका-
मित्येतादृशमेव हा न सहसे सङ्कल्पमात्रं विधे ।।

सत्य- भो भअवदि, कहं अअं संवादो मलअवदीमन्दिरप्पदेदो विअ सुणीयज्जदि।

(छाया)-भो भगवति कथमयं संवादः मलयवतीमन्दिरप्रदेशादिव श्रूयते।

कात्या-कः सन्देहः?

(प्रविश्य पटाक्षेपेण कलावती)

कला-(ससम्भ्रमम्)भो भो भअवदि अह्मदेवि परित्तहइ थणबन्ध णठिआ सा किल तवस्सिणी केणवि सन्देट्ठेव परिब्भमन्ती किं वि किं वि भणिअ मुच्छं गआ चिट्ठदि।

(छाया)-भो भो भगवति अस्मद्देवि,परित्राहि। घनबन्ध नस्थिता सा किल तपस्विनी केनापि सन्दष्टेव परिभ्रमन्ती किमपि किमपि भणित्वा मूर्छां गता तिष्ठति।

सत्य-(सविषादम्) हन्द भअवदि इअ वि एव्वं जादाजइ किं अण्णं करिस्सह्मि।

(छाया)-हन्त भगवति इसमेवं जाता येदि किमन्यत्करिष्यामि।

कात्या-देवि, सर्वे वयं सपदि तत्र गच्छामः।

(सर्वे मलयवतीमन्दिरे प्रवेशं नाटयन्ति)

देवः-(मलयवती निर्वर्ण्य)(सनिश्वासम्)

इयमन्येव सञ्जाता विषवेगेन कामिनी।
पद्मिनीव प्रदोषेण मुकुलीकृतपङ्कजा ।।

सत्य-(सकातर्यम्) "हा कणीअसि माणवदि
हा सहणसीले कल्लाणि अविणीदकारिणिं अवि मं
सहोहि पेच्छ वच्चले मळयवदि।

(छाया)- *हा कनीयसि मानवति*
हा सहनशीले कल्याणि ।
अविनीतकारिणीमपि मां
सहस्व पश्य वत्सले मलयवति ।।

(इति मुखमुन्नमयति)

सिद्ध-(निर्वर्ण्य) (सविमर्शमात्मगतम्) हा हन्त, किमियं वत्सा वकुलमालिनीव दृश्यते । कथमिह सा भविष्यति । शृणुमस्तावत्। (प्रकाशम्) देवि, मा भैषीः, पश्य, क्षणेन देवस्य नृसवितुः करस्पर्शमात्रेण सामोदस्मितमुखी भविष्यतीयं पद्मिनी ।

देवः-(सखेदम्) अयि देवि कथमत्रोपायः ।

कात्या- देव, जीवय सत्वरमेनाम् ।

देवः- *अयि कल्याणि सुश्रोणि दयिते मयि ते नते ।*
मौनं माकुरु मां दीनं प्रसादय विनोदय ।।

(इति करेण मुखं स्पृशति) .

मल-(नयने स्पष्टमुन्मील्य)(परितः सचकितम्) अह्मो कहं एद्ध देवो । कहं णु इअं सा भअवदी । कदो उण इदो देवीअ अच्चरिअं एद्ध कहं णु अह्मतादस्स सरीरन्तरं अमच्चो कहं एसा अहं एत्थ एव्वं णिद्दापरवसा चिट्ठह्मि।

(छाया)-अहो कथमत्र देवः। कथंन्वियं सा भगवती। कुतः पुनरितो देवी च । आश्चर्यमत्र कथंनुअस्मत्तातस्य शरीरान्तरनममात्यः। कथमेषाहमत्रैवं निद्रापरवशा तिष्ठामि।

(सपदि समुत्थाय सलज्जमधोमुखी तिष्ठति)

देवः- (सहर्षम्) अहह पश्य देवि, भाग्यवशादिदानी सर्वे वयं सजीवितास्स्मः।

सत्य- (सानन्दम् सपदि तां परिष्वज्य) एहि कणीअसि दिट्ठिआ जीविअह्मि।

(छाया)-एहि कनीयसि दिष्टया जीवितास्मि ।

(शिरस्याघ्राय) भो भअवदि अच्चरिअं अच्चरिअं अह्मदेवचाउरिअम्। जस्स परिसमेत्तेण जीविदेअम्।-

(छाया)-भो भगवति आश्चर्य आश्चर्यम् अस्मद्देवचातुर्यम् यस्य स्पर्शमात्रेण जीवितेयम्।

(लज्जां नाटयति)

कात्या-देवि, किमाश्चर्यमेतत् यस्य नामैवालमार्तजनसंरक्षणाय।

सिद्ध-(सशिरःकम्पम्) सद्धिमाह भगवती।

सत्य-भद्दे कणीअसि पणम भआवदिम् ।

(छाया)-भद्रे कनीयसि प्रणम भगवतीम् ।

मल-भअवदि पणमामि।

(छाया)-भगवति प्रणमामि।

कात्या- (सबहुमानम्)मान्ये, चिरं जीव।

सिद्ध-(मलयवतीं निर्वर्ण्य) (सत्यभामां प्रति)
भो देवि, किमियं भवत्याः सहोदर्येव कनीयसी ।

देव:-(सस्मितम् कात्यायनीं पश्यति) अयि देविए कथय कथय, अयं किलास्माकमन्तरङ्गममात्य:।

सत्य-(स्वगतम्) अअं इमं जाणादिव्व पडिभाइ। अहव किं इदो वरं गोवणेण।

(छाया)-अयमिमां जानातीव प्रतिभाति। अथवा किमित: परं गोपनेन।

(प्रकाशम्)अय्य इअं कि देसन्दरादो आणीदा किदा अ कणीयसी।

(छाया)-आर्य इयं हि देशान्तरादानीता कृता च कनीयसी।

सिद्ध-(सविनयम्)देवि, तर्हि किञ्चित्प्रष्टव्यमस्ति।

कात्या-(देवं संज्ञापयति)

सत्य-यथा रोचते मानसमार्यस्य।

सिद्ध-(मलयवतीमवलोक्य) आर्ये कस्य पुनर्महाराजस्य कुलं पवित्रितमवतारेण भवत्या।

मल-(सचकितं कात्यायनीं पश्यति)

कात्या- वत्से, भण, मा भैषी:।

सत्य-(स्वगतम्) अवि णाम इअं एव्व वउलमालिणी भविस्सदि।

(छाया)-अपि नाम इयमेव वकुलमालिनी भविष्यति।

(प्रकाशम)(सानुनयम्) अयि मलअवदि किदं विलंबेण।
(छाया)-अयि मलयवति, कृतं विलम्बेन ।

मल-(स्वगतम्) आणत्तं खु भअवदीए।
(छाया)-आज्ञत्पं खलु भगवत्या।

(प्रकाशम्) अय्य तादो मे राआ पण्डमण्डलस्स।
(छाया)-आर्य तातो मे राजा पाण्ड्यमण्डलस्य।

सिद्ध- मान्ये किन्नु वकुलमालिन्येव भवती।

वकुल-(सलज्जमधोमुखी तिष्ठति)

सत्य- (साश्चर्यानन्दम्) अह्महे भअवदि इअं एव्व किं सा वउळमाळिणी जादा।
(छाया)-अहो भगवति इयमेव किं सा वकुलमालिनी जाता।

कात्या-देवि, जात खलु विशेषदर्शनम् ।

देवः- (सस्मितम्) फलितं तव लक्ष्मीपूजया ।

सिद्ध-(सपुलकम्) पश्य देवि -

नाहितं कुरुते दैवमिति मे निश्चितं मनः ।
यस्मादभीष्टमस्माकमप्रयत्नादजायत ।।

सत्य-(सानुशयं सहर्षं च) (वकुलमालिनीमाश्लिष्य) हा जीविए कळ्ळाणि मणरहफलदाए दिट्ठिआ उबट्ठिअं अवि तुमं अजाणन्तीए मए हन्द अच्चन्द अणुचिदं आचरिददं साहसिआए हा सहणसीले वउळमाळिणि सहेहि चरिअं अप्पद्दोहिणीए।
(छाया)-हा जीविते कल्याणि मनोरथफलतया दिष्टया उपस्तितां अपित्वामजानन्थ्या मया हन्त, अत्यन्तानुचितमाचरितम्

साहस्या। हा सहनशीले वकुलमालिनि, सहस्व चरितमात्मद्रोहिण्या:।

(संस्कृतमाश्रित्य)

निर्दया नितरां साहं यदिमामतिकोमलाम् ।
अविमृश्य बहुक्लेशं कृतवत्यस्मि हा कथम् ।।

देव:-(सस्मितम्) देवि, मैवं विषाद: यदियमजानन्त्यापित्वया कनीयसीत्वेऽभिषिच्य पोषितैव ननु?

कात्या- देवि, किमियमितरा भवत्या:।

सिद्ध-(सशिर:कम्पम्) सत्यमाह भगवती।

सत्य- भो भअवदि कुदो से मळयअवदित्ति णाम जादम्।

(छाया)-भो भगवति कुतोऽस्या: मलयवतीति नाम जातम्।

कात्या-मलयपर्वतादियमानीतेति कृतं तथा नाम।

सत्य-कदो इअंमालअं गदा।

(छाया)-कस्मादियं मलयं गता।

सिद्ध-देवि, देवीपूजामुद्दिश्य।

सत्य- (सस्मरणम्) आम् आम् सुदं एव्व।

(छाया)-अस्ति अस्ति आम्, आम् श्रुतमेव ।

(कात्यायनीमवलोक्य) भअवदि, अच्चरिअं अह्मलच्छीदेवीए पहावो। कहं विअ मणरहो पूरिओ ।

(छाया)-भगवति, आश्चर्यमस्मल्लक्ष्मीदेव्या: प्रभाव:। कथमिव मनोरथ: पूरित:

कात्या-देवि, किमन्यत् । प्रसन्ना ते देवी लोकमाता।

देव: (स्वगतम्) अहो फलितं भगवत्या: कपटनाटकचातुर्यम्।

(प्रकाशम्) भवतु, सर्वमेतत् अन्यादृशं भगवति ते कारुण्यम् । यदिह सच्चिदानन्दमयपरब्रह्मरूपसततनिदिध्यासन-समुचितैकस्वभावमपि सवासनसन्त्यक्तसांसारिकव्यापारमपि तव चेतः अस्माकमेतादृशव्यापारेषु निहितं भवत्या।

कात्या-(विहस्य) देव,मैवं वादीः। इदमेव हि तपः फलमस्माकम्। (सत्यभामामवलोक्य) देवि कृतं विलम्बेन।

सत्य-(सोत्प्रासं देवं निर्वर्ण्य)

जं णिमित्तं मए तन्तं तं इमं पेच्छ दे पिअम् ।
अणुहो हि सुहं णिच्चं अह्मेसुअ दआ हवे।।

(छाया)-यन्निमित्तं मया तान्तं तमिमं पश्य ते प्रियम्।
अनुभुङ्क्ष्व सुखं नित्यमस्मासु च दवा भवेत् ।।

(सलज्जं वकुलमालिनीपाणिं देवपाणौ घटयति)

देवः-(सहर्षरोमाञ्चम्)(पाणिं गृहीत्वा) अयि देवि, सत्यप्रतिज्ञासि।

कात्या-(सत्यभामाहस्तमपि देवहस्ते विन्यस्य)
देव, सफलय मे प्रार्थनामेताम्।
अनुभुङ्क्ष्व समं देव्यौ परस्परसमाकृती।
यथैव भुङ्क्ते मधुपो मधुरां मञ्जरीयुगीम् ।।

देवः- (सानन्दपुलकं देव्यौ भुजाभ्यामाश्लिष्याघ्राय) (आत्म{गतम्})
हन्त, पुण्यवानस्मि ।

(प्रकाशम्) यदाह भगवती तच्छिरसो भूषणम्।

कात्या-(किञ्चिदिव विचिन्त्य) हे देव,वकुलमालिनी-परिणेतुरखिलसाम्राज्यसिद्धिरिति दैवज्ञानं प्रवादः।

देवः-(सामोदम्) अवितथं भवतु भगवतीवचनम्।

सिद्ध-(सोत्साहम्) अहो फलितं मदीयं जन्म। येन भाग्यवता मया महानुत्सवोऽनुभूतः स्वामिनः।

सत्य-(परितोऽवलोक्य)(सहर्षम्) संस्कृतमाश्रित्य

मनोरोगः शान्तः सहजननरागोऽपि फलितः
प्रतिज्ञा निर्वृत्ता परमिह तु तातस्य मम च।
कृतार्थो देवोऽपि प्रगुणपदुचिन्ता भगवती
निदानं सर्वेषां नियतमिह देवीविलसितम् ।।

कात्या-(विचिन्त्य) देव जातमेव सर्वमानन्दकरमस्माकम् । किन्तु कारिवसुमहाराजस्य बन्धनादेव चिन्तां वहति मे चेतः।

सिद्ध-अहो समयज्ञता भगवत्याः ।

वकुल- अह्मो तह जादो किं अह्मतादो ।

(छाया)-अहो तथा जातः किमस्मत्तातः ।

सत्य-(सखेदं देवं पश्यति)

देवः-(सविस्रम्भं देव्योर्मुखमाघ्राय) अयि युवयोर्मैवं विषादः। (कात्यायनीमवलोक्य)(सबहुमानम्) भगवति, युक्तमिह चिन्तितंभवत्या।

तथा भवतु नाम -

त्वमिह सपदि गत्वा रुक्मिणीमुख्यकान्ता -
निकरमपि विमानं सङ्गमय्य क्षणेन ।
सकलमपि तथान्यत्साधु सज्जीकुरुष्व
त्वरितमहमिदानीं प्रस्थितोऽस्म्येव पश्य ।।

अयि कान्ते, भवत्यौ च भगवतीमनुसरतः ।

कात्या-यदादिशति देव:।

(इति वकुलमालिनीसत्यभामाभ्यां सह अन्त:पुरप्रवेशं नाटयति)

सिद्ध-(सप्रश्रयम्) असाधारणी खल्वाश्रितजनसंरक्षणजागरूकता स्वामिन: ।

देव:-भो अमात्य, वयमपि सन्नद्धा भवाम: ।

(इति तत्करन्यस्तपणिरास्थानीमधिगच्छति)

(तत: प्रविश्य दौवारिक:)

दौवा- स्वामिन्, द्वारमधितिष्ठति सेनापति: ।

देव:- अये सपदि प्रवेशय तम् ।

दौवा- तथा । (इति निष्क्रान्त:)

(तत: प्रविश्य महासेन:)

महासेन:- (पुरोऽवलोक्य) अहह कथं स्वयमपि जैत्रयात्रासन्नद्ध इव दृश्यते स्वामी ।

यत:-

कवचकलितगात्र: कल्पितोष्णीषबन्ध:
परिधृतमणिवेत्र: पादुकान्यस्तपाद: ।
निजमिह भुजमेकं चापकोटौ निधाय
स्फुरति धुरि नितान्तं वीरलक्ष्मीसहाय: ।।

(उपसृत्य कृताञ्चलिस्तिष्ठति)

देव:- अये महासेन, सज्जितानि किन्नु सैनिकानि।

महा-स्वामिन्न केवलं सज्जितानि विजयधन्वविजयाय विजयं प्रमुखीकृत्य प्रेषितानि च ।

सिद्ध-(सहर्षम्) धीर किमरं, हृदयज्ञोऽसि स्वामिनः।

महा- अन्यदपि विज्ञापनमवधारयतु स्वामी।

जित्वा हूणशकादिकान् जनपदान् भित्वा च तत्तद्रिपून्
सत्वानां निलयोऽस्मदीयविजयो मत्वा तृणायापरान् ।
दत्वा कीर्तिपटीं दिशा मुगदृशां तीर्त्वा कवेरात्मजां
गत्वा चोलमहीं परं च परितः कृत्वा चमूं तिष्ठति।।

सिद्ध- किं बहुनान्वर्थनामा विजयोऽपि ।

देवः- (स्वगतम्) उक्तं हि भगवत्या
वकुलमालिनीपरिणयान्महानतिशयो भविष्ययतीति।

(प्रकाशम्) अये किमिदानीमपि न साधितः परः

महा-स्वामिन्नधुना लब्धा प्रवृत्तिरेतावत्येव ।

देवः- विजयधन्वा किल स राजाऽपि । अस्तु, महासेन,वयमपि सपदि गच्छामः ।

महा-(सविनयम्) यथा रोचते स्वामिनश्चित्तम् ।

सिद्ध- सत्यसङ्कल्पः खलु स्वामी ।

देवः- (कतिचित्पदानि गत्वा ऊर्ध्वमवलोक्य सहर्षम्) अहो भगवत्याः प्रभावः, पश्य

सूमेरुशिखरप्रभं सुवदनावलीमण्डितं
विमानमिदमद्भुतं वियति वातचच्चद्ध्वजम्
सुरोत्तमसुलोचनानिचयसुन्दरं पुष्पकं
विजेतुमिव वेगतः समुदतिष्ठदन्तःपुरात् ।।

सिद्ध-(साश्चर्यं निर्वर्ण्य) देव, भगवती स्वयमपि विमानद्वारमध्यास्ते ।

कात्या- (विमानावतरणं नाटयित्वा) भो देव सर्वमपि सज्जं,सपदि सनाथीक्रियतां विमानम् ।

देवः- अये महासेन, सकलमेव सैन्यं विमानमधिरोहतु।

(सर्वे विमानारोहणं नाटयन्ति)

कात्या- (सहर्ष) दे देव, मध्येयौवतमुपविशतु भवान् ।

देवः-(सप्रश्रयम्) यदादिशति भगवती ।

(रुक्मिणीसत्यभामामध्य उपविशति)

कात्यायनी- देव, इयं ते भूयादङ्कभूषणम् ।

(वकुलमालिनीमङ्के. निधाय) भो सिद्धयोग-

सौन्दर्यसममदविलासनितान्तकान्त-
कान्तासहस्रमधितिष्ठति पश्य नाथे ।
कुञ्जे सलीलकरिणीतरुणीघटान्त-
गन्धासिन्धुरविचित्रविहारशैलीम् ।।

सिद्ध- भगवति फलितं चक्षुः सम्पदा ।

कात्या-(विमानवेगं निरूप्य) आश्चर्यं देव क्षणेन दूरतरमानीता वयमनेन विमानेन ।

यतः-

पश्चाद्यातः प्रभासः प्रविरलमधुना पश्य गोदावरीयं
शैलोऽयं वेङ्कटाख्यः करिगिरिरमुकः कृष्णधामैतदेव।
श्रीमुष्णं धाम तत्र स्फुरति हि भगवानत्र भूम्या सहास्ते
श्रीरङ्गं तुङ्ग.शृङ्गं. विलसति पुरतः सह्यजासैकतेषु ।।

सिद्ध-आश्चर्यं भगवत्याः प्रभावः ।

देवः- (सहर्षं पश्यति)

महा-भगवति सपदि निरोद्धव्यः निरोद्धव्यः विमानराजः ।
इदमेव सेनानिवेशस्थानमस्माकम् ।

कात्या- तथा ।

(इति विमानं स्थापयति)

सिद्ध-(अधो निर्वर्ण्य) भगवति इदं हि चम्पकारण्यम् । अत्र किल गोभिलमुनिर्दिश्चरं तपश्चरति।

कात्या- इदमेव हि तत्त्पसः फलमखण्डितमिदानीं यदिह द्वारकानाथसमागमः।

महा-अवलोकयतु स्वामी ।

कनकगिरिपरीक्षां कर्तुकामेन धात्रा
कषणपदमिवोच्चैः कल्पितं भूमिभागे ।
कनति पुरत एतत्काननं काञ्चनानां
निजरुचिजितचञ्चच्चञ्चलापुञ्जभासाम्।।

देवः-(निर्वर्ण्य) अये महासेन, केन पुनरत्र निर्मितं पुरम् ।

महा-जैत्रयात्राभृशनिहितभावस्य स्वामिनो हृदयमधिगम्य तदानीमेव सेनानिवेशकरणाय परमेष्ठिसविधं प्रति प्रेषितो जयः । अवलोकयतु स्वामी-

मध्ये चम्पककाननं पुखरं निर्माय नर्मावहं
वेधा द्वारवतीविडम्बनधिया दाक्षिण्यमद्यादधे ।
यत्सौधाञ्चलकाञ्चनद्दवजपटीमन्दाकिनीतीरग-
क्रीडाश्रान्तसुराङ्गनार्यजनतां धत्ते शनैश्चञ्चला ।।

सिद्ध-(साश्चर्यम्) अहो महिमा महासेनस्य ।

कात्या-किमन्यत् । अथवा प्रकटयति सर्वमपि स्वामिनः प्रभावम्।

देव:-अये किञ्चिदुत्तरत: कस्य पुनरियं दृश्यते राजधानी ।

महा-स्वामिन्, विजयधन्वन: प्रधानराजधानी।

देव:- तर्ह्युचितमेवेदं सेनानिवेशस्य। भगवति शीघ्रमेव विमानमवतारय।

कात्या-तथा ।

(इति विमानमवतारयति)

देव:-(रुक्मिणीसत्यभामादत्तहस्त: सह वकुलमालिन्या विमानादवतीर्य) अये महासेन, सर्वेऽपि यथोचित्यानमारोहन्तु ।

महा-यदाह स्वामी ।

देव:-भगवति इतराश्च प्रेयसीरनेन विमानेनैव प्रधानभवनान्त: पुरं प्रापय।

कात्या- तथा ।

(इति निष्क्रान्ता)

देव:-(रुक्मिणीसत्यभामावकुलमालिनीसहित: चतुरन्तयानमधिरुह्य विथिकां प्रविशति)

महा-(पुरोऽवलोक्य)अहो समयज्ञौ वैतलिकौ ।

(तत: प्रविशतो वैतलिकौ)

एक:- आश्चर्यं, पश्य सखे -

अध्यास्य प्रथमानरत्नशिबिकामाकुञ्च्य वामं पदं
न्यञ्चान्यं चरणं निधाय निकटे सत्यां तथा रुक्मिणीम्।
विन्यस्याभिमुखीं नवां प्रियतमां वेत्रं च बिभ्रन्करे
शृङ्गारैकनिधिर्विवेश नगरीं श्रीद्वारकानायक:।।

इतरः-वयस्य, धन्य धन्याः महासेनप्रमुखाः यतः स्वामिनो यानपार्श्वमवलम्ब्याधावन्ति ।

(उपसृत्य) जय जय निजबन्धुदुग्धाब्धिचन्द्रस्वरूप,
जय जय शिशुपालजम्बालसन्तापधीस्प्रताप,
जय जय वररुक्मिणीसत्यभामादिकान्तासहस्रान्तरङ्ग.,
जय जय यदुनाथ लोकैकनाथ स्वलावण्यसाराभिरामाङ्ग.
जय जय स्वामिन् विजयी भव स्वामिन्नित इतो दीयतां कटाक्षः पुण्डरीकाक्षेण ।

उन्निद्रोभयपार्श्वमन्दिरघटानिक्षिप्तरत्नच्छटा
जातान्योन्यमिलत्प्रभाचयमयोद्भास्वद्वितानश्रिया ।
त्वत्सेवाकुलमत्तदिव्यतरुणीनेत्राब्जरेखाकृत -
स्फारोदारविशालतोरणचणा भाति प्रतोली स्वयम्।।

किञ्च-

प्रतिगृहकृतचित्रछत्रचञ्चद्ध्वजाली -
फगलभरनतरम्भास्तम्भसम्भावितानाम् ।
समदयुवतिजातायातयाताकुलानां
विलसति विविधानां वीथिकानां समूहः।।

महा-(सविनयमुपसृत्य) इदमिह निरुपममणिगणखचित-शिखरविसररुचिरगोपुरनिकरसुन्दरं श्रीमन्दिरं प्रविशतु स्वामी ।

देवः-(सहर्षं प्रवेशं नाटयति)

महा-

कनत्कनकगम्भीरसहस्रस्तम्भमण्डपे ।
परिष्करोत्विमां देवो भद्रपीठीं महोन्नताम् ।।

देवः-(देवीभिः सह भद्रपीठीमारुह्य समुपविश्य सर्वतोऽवलोक्य सहर्षम्) अये महासेन किमन्यदियं सर्वथा दक्षिण द्वारकैव।

भवतु नाम सर्वमिदम्। कथमास्ते स राजा विजय धन्वा।

महा-(सहर्षसम्भ्रमम्) जितं स्वामिना।

सन्धिमिच्छन्नयं राजा मन्दिरद्वारमण्डपे।
स्वामिनः समयाकाङ्क्षी मन्त्रिव्याजेन तिष्टति।।

सिद्ध- (सानन्दम्) हन्त,. किं न जानाति स्वामिनः प्रभावम्।

देवः-अये जाने, तदमात्यः खलु भक्तिसारः। सपदि प्रवेशय तम्।

महा-तथा।

(इति निष्क्रम्य तेन सह प्रविशति)

भक्ति-(पुरोऽवलोक्य सपुलकम्) अत्यद्भुतं रत्नपीठिकासमवस्थानं स्वामिनः।

नदीभिरिव वाशशिस्तटिद्भिरिव नीरदः।
देवो विभाति देवीभिर्ताताभिरिव कल्पकः ।।

(सभ्यपसृत्य करनिकरं पुरतो नि धाय) जय जय स्वामिन्।

(इति प्रणम्याञ्चलिं बद्दनाति)

देवः(सबहुमानम् उपनिधाय) अमात्यमणे स्वागतं भवते ।

भक्ति-(सविनयम्) किं पुनः स्वामिनि दयाकारिणि।

सिद्ध-(सासूयम्) अन्यादृशं शरणागतेषु वात्सल्यं स्वामिनः यदिदानीं परप्रयुक्तेऽपि मन्त्रिणि महान् प्रसादः।

भक्ति-सिद्धयोग, किमेतदाश्चर्यम् । किं न जानासि स्वामिना पुरा कृतं महापराधिजनानुजेऽपि

"मित्रभावेऽपि सम्प्राप्तं न त्यजेयं कथञ्चन ।
दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम्।।
विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ।
आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया" ।। इति ।

महा-(सभक्तिपुलकम्) सम्यगुक्तं भक्तिसारेण।

देवः-(सस्मितम्) भक्तिसार किमस्मासु प्रसादं करोति राजा विजयधन्वा ।

भक्ति-(सभयकम्पम्) किमेवं वक्तुमर्हति स्वामी ।

बलेन वयसा श्रिया प्रभुतया च गाम्भीर्यतः
स्वरूपविभवादिमैरनुपमैश्च तैस्तैर्गुणैः ।
परस्परसमानयोः परमुदारयोः स्वामिनोः
कथं नु युवयोर्भिदा घटनमेव युक्तं मयः।।

अन्यदपि विज्ञापनमवधारयतु स्वामी। राजापि तत्रभवान् स्वामिना कृतं महाराजकारिवसुनन्दनापाणिग्रहणमङ्गलमाकर्ण्य तदानीमेवा-यमस्माकं मान्य इति महाराजकारिवसुं सबहुमानं स्वामिनः सेनापतिना विजयधीरेण सहैव निजराज्यं प्रेषितवानासीत्।

देवः-(सानन्दम्) अथवा कथमस्माकं विजय धन्वनश्च भेदः। सिद्धयोग, सर्वमुपपन्नं हि नः समीहितम्।

सिद्ध-(सोत्साहम्) सिद्धसङ्कल्पः किल स्वामी।

देवः- अये, महासेन, सपदि संमानय सिद्धयोगभक्तिसारौ निजनिजमहाराजपरिसरगमनाय।

अहन्तु-

ततबुधजनमुख्ये दक्षिणे द्वारकाख्ये
सकलगुणवरेण्ये चम्पकानामरण्ये ।

सह नवतरुणीभिः सत्यभामादिकाभिः
धनविहरणकृत्यं कर्तुमिच्छामि नित्यम् ।।

महा-(सविनयम्) भक्तियादिह रोचते स्वामिनः चित्तम्। (परिवृत्य यथोचितममात्यौ पुरस्कृत्य सहर्षं परितोऽवलोक्य) भो भो जातः खलु सर्वतः परमानन्दसन्दोहः।

तथापीयमस्तु भरतभारती-

नित्यं सस्यनिरन्तरास्तु पृथिवी सैख्यं सतामेधतां
देशोऽयं निरुपद्रवोऽस्तु सततं राजा स्वयं धार्मिकः।
श्रेयोभिः परिवर्धतां नवनवैः श्रीराजगोपः प्रभुः
नित्यं श्रीर्भविता सभापतिरयं श्रीमुष्णधामा हरिः।।

(इति निष्क्रान्ताः सर्वे)

इति श्रीमुष्णनगरनिवासिकौण्डिन्यकुलतिलकायमानश्रीवीरवल्लि-वरदनारायणगुरुतनयश्रीनिवासमहागुरुकृतिषु वकुलमालिनीपरिणय-नाम्नी नाटिका सम्पूर्णा ।।

Printed by Chennai Printers' Industrial Co-operative
Society Ltd.,
Chennai 600 005.
Phone: 8546287